# adhyAtmarAmAyaNe yuddhakANDam

# અધ્યાત્મરામાયણે યુદ્ધકાણ્ડમ્

## Document Information

Text title : adhyAtma rAmAyaNa yuddha kANDa

File name : adhyaatmaRamyuddha.itx

Category : adhyAtmarAmAyaNa, raama, vyAsa

Location : doc_raama

Author : Shri Veda Vyas

Transliterated by : Vishwas Bhide vishwas underscore bhide at yahoo.com

Proofread by : Vishwas Bhide, PSA EASWARAN

Latest update : July 22, 2006, April 4, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# અધ્યાત્મરામાયણે યુદ્ધકાણ્ડમ્

## ॥ પ્રથમઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
યથાવદ્ભાષિતં વાક્યં શ્રુત્વા રામો હનૂમતઃ ।
ઉવાચાનન્તરં વાક્યં હર્ષેણ મહતાવૃતઃ ॥ ૧॥

કાર્યં કૃતં હનુમતા દેવૈરપિ સુદુષ્કરમ્ ।
મનસાપિ યદન્યેન સ્મર્તું શક્યં ન ભૂતલે ॥ ૨॥

શતયોજનવિસ્તીર્ણં લઙ્ઘયેત્કઃ પયોનિધિમ્ ।
લઙ્કાં ચ રાક્ષસૈર્ગુપ્તાં કો વા ધર્ષયિતું ક્ષમઃ ॥ ૩॥

ભૃત્યકાર્યં હનુમતા કૃતં સર્વમશેષતઃ ।
સુગ્રીવસ્યેદૃશો લોકે ન ભૂતો ન ભવિષ્યતિ ॥ ૪॥

અહં ચ રઘુવંશશ્ચ લક્ષ્મણશ્ચ કપીશ્વરઃ ।
જાનક્યા દર્શનેનાદ્ય રક્ષિતાઃ સ્મો હનૂમતા ॥ ૫॥

સર્વથા સુકૃતં કાર્યં જાનક્યાઃ પરિમાર્ગણમ્ ।
સમુદ્રં મનસા સ્મૃત્વા સીદતીવ મનો મમ ॥ ૬॥

કથં નક્રઝષાકીર્ણં સમુદ્રં શતયોજનમ્ ।
લઙ્ઘયિત્વા રિપું હત્વા કથં દ્રક્ષ્યામિ જાનકીમ્ ॥ ૭॥

શ્રુત્વા તુ રામવચનં સુગ્રીવઃ પ્રાહ રાઘવમ્ ।
સમુદ્રં લઙ્ઘયિષ્યામો મહાનક્રઝષાકુલમ્ ॥ ૮॥

લઙ્કાં ચ વિધમિષ્યામો હનિષ્યામોઽદ્ય રાવણમ્ ।
ચિન્તાં ત્યજ રઘુશ્રેષ્ઠ ચિન્તા કાર્યવિનાશિની ॥ ૯॥

એતાન્ પશ્ય મહાસત્ત્વાન્ શૂરાન્ વાનરપુઙ્ગવાન્ ।
ત્વત્પ્રિયાર્થં સમુદ્યુક્તાન્ પ્રવેષ્ટુમપિ પાવકમ્ ॥ ૧૦॥

સમુદ્રતરણે બુદ્ધિં કુરુષ્વ પ્રથમં તતઃ ।
દૃષ્ટ્વા લઙ્કાં દશગ્રીવો હત ઇત્યેવ મન્મહે ॥ ૧૧॥

નહિ પશ્યામ્યહં કઞ્ચિત્ત્રિષુ લોકેષુ રાઘવ ।
ગૃહીતધનુષો યસ્તે તિષ્ઠેદભિમુખો રણે ॥ ૧૨॥

સર્વથા નો જયો રામ ભવિષ્યતિ ન સંશયઃ ।
નિમિત્તાનિ ચ પશ્યામિ તથા ભૂતાનિ સર્વશઃ ॥ ૧૩॥

સુગ્રીવવચનં શ્રુત્વા ભક્તિવીર્યસમન્વિતમ્ ।
અઙ્ગીકૃત્યાબ્રવીદ્રામો હનૂમન્તં પુરઃસ્થિતમ્ ॥ ૧૪॥

યેન કેન પ્રકારેણ લઙ્ઘયામો મહાર્ણવમ્ ।
લઙ્કાસ્વરૂપં મે બ્રૂહિ દુઃસાધ્યં દેવદાનવૈઃ ॥ ૧૫॥

જ્ઞાત્વા તસ્ય પ્રતીકારં કરિષ્યામિ કપીશ્વર ।
શ્રુત્વા રામસ્ય વચનં હનૂમાન્ વિનયાન્વિતઃ ॥ ૧૬॥

ઉવાચ પ્રાઞ્જલિર્દેવ યથા દૃષ્ટં બ્રવીમિ તે ।
લઙ્કા દિવ્યા પુરી દેવ ત્રિકૂટશિખરે સ્થિતા ॥ ૧૭॥

સ્વર્ણપ્રાકારસહિતા સ્વર્ણાટ્ટાલકસંયુતા ।
પરિખાભિઃ પરિવૃતા પૂર્ણાભિર્નિર્મલોદકૈઃ ॥ ૧૮॥

નાનોપવનશોભાઢ્યા દિવ્યવાપીભિરાવૃતા ।
ગૃહૈર્વિચિત્રશોભાઢ્યૈર્મણિસ્તમ્ભમયૈઃ શુભૈઃ ॥ ૧૯॥

પશ્ચિમદ્વારમાસાદ્ય ગજવાહાઃ સહસ્રશઃ ।
ઉત્તરે દ્વારિ તિષ્ઠન્તિ સાશ્વવાહાઃ સપત્તયઃ ॥ ૨૦॥

તિષ્ઠન્ત્યર્બુદસઙ્ખ્યાકાઃ પ્રાચ્યામપિ તથૈવ ચ ।
રક્ષિણો રાક્ષસા વીરા દ્વારં દક્ષિણમાશ્રિતાઃ ॥ ૨૧॥

મધ્યકક્ષેઽપ્યસઙ્ખ્યાતા ગજાશ્વરથપત્તયઃ ।
રક્ષયન્તિ સદા લઙ્કાં નાનાસ્ત્રકુશલાઃ પ્રભો ॥ ૨૨॥

સઙ્ક્રમૈર્વિવિધૈર્લઙ્કા શતઘ્નીભિશ્ચ સંયુતા ।
એવં સ્થિતેઽપિ દેવેશ શ‍ૃણુ મે તત્ર ચેષ્ટિતમ્ ॥ ૨૩॥

દશાનનબલૌઘસ્ય ચતુર્થાંશો મયા હતઃ ।
દગ્ધ્વા લઙ્કાં પુરીં સ્વર્ણપ્રાસાદો ધર્ષિતો મયા ॥ ૨૪॥

શતઘ્ન્યઃ સઙ્ક્રમાશ્ચૈવ નાશિતા મે રઘૂત્તમ ।
દેવ ત્વદ્દર્શનાદેવ લઙ્કા ભસ્મીકૃતા ભવેત્ ॥ ૨૫॥

પ્રસ્થાનં કુરુ દેવેશ ગચ્છામો લવણામ્બુધેઃ ।
તીરં સહ મહાવીરૈર્વાનરૌઘૈઃ સમન્તતઃ ॥ ૨૬॥

શ્રુત્વા હનૂમતો વાક્યમુવાચ રઘુનન્દનઃ ।
સુગ્રીવ સૈનિકાન્ સર્વાન્ પ્રસ્થાનાયાભિનોદય ॥ ૨૭॥

ઇદાનીમેવ વિજયો મુહુર્તઃ પરિવર્તતે ।
અસ્મિન્મુહુર્તે ગત્વાહં લઙ્કાં રાક્ષસસઙ્કુલામ્ ॥ ૨૮॥

સપ્રાકારાં સુદુર્ધર્ષાં નાશયામિ સરાવણામ્ ।
આનેષ્યામિ ચ સીતાં મે દક્ષિણાક્ષિ સ્ફુરત્યધઃ ॥ ૨૯॥

પ્રયાતુ વાહિની સર્વા વાનરાણાં તરસ્વિનામ્ ।
રક્ષન્તુ યૂથપાઃ સેનામગ્રે પૃષ્ઠે ચ પાર્શ્વયોઃ ॥ ૩૦॥

હનૂમન્તમથારુહ્ય ગચ્છામ્યગ્રેઽઙ્ગદં તતઃ ।
આરુહ્ય લક્ષ્મણો યાતુ સુગ્રીવ ત્વં મયા સહ ॥ ૩૧॥

ગજો ગવાક્ષો ગવયો મૈન્દો દ્વિવિદ એવ ચ ।
નલો નીલઃ સુષેણશ્ચ જામ્બવાંશ્ચ તથાપરે ॥ ૩૨॥

સર્વે ગચ્છન્તુ સર્વત્ર સેનાયાઃ શત્રુઘાતિનઃ ।
ઇત્યાજ્ઞાપ્ય હરીન્ રામઃ પ્રતસ્થે સહલક્ષ્મણઃ ॥ ૩૩॥

સુગ્રીવસહિતો હર્ષાત્સેનામધ્યગતો વિભુઃ ।
વારણેન્દ્રનિભાઃ સર્વે વાનરાઃ કામરૂપિણઃ ॥ ૩૪॥

ક્ષ્વેલન્તઃ પરિગર્જન્તો જગ્મુસ્તે દક્ષિણાં દિશમ્ ।
ભક્ષયન્તો યયુઃ સર્વે ફલાનિ ચ મધૂનિ ચ ॥ ૩૫॥

બ્રુવન્તો રાઘવસ્યાગ્રે હનિષ્યામોઽદ્ય રાવણમ્ ।
એવં તે વાનરશ્રેષ્ઠા ગચ્છન્ત્યતુલવિક્રમાઃ ॥ ૩૬॥

હરિભ્યામુહ્યમાનૌ તૌ શુશુભાતે રઘૂત્તમૌ ।
નક્ષત્રૈઃ સેવિતૌ યદ્વચ્ચન્દ્રસૂર્યાવિવામ્બરે ॥ ૩૭॥

આવૃત્ય પૃથિવીં કૃત્સ્નાં જગામ મહતી ચમૂઃ ।

પ્રસ્ફોટયન્તઃ પુચ્છાગ્રાનુદ્વહન્તશ્ચ પાદપાન્ ॥ ૩૮॥

શૈલાનારોહયન્તશ્ચ જગ્મુર્મારુતવેગતઃ ।
અસઙ્ખ્યાતાશ્ચ સર્વત્ર વાનરાઃ પરિપૂરિતાઃ ॥ ૩૯॥

હૃષ્ટાસ્તે જગ્મુરત્યર્થં રામેણ પરિપાલિતાઃ ।
ગતા ચમૂર્દિવારાત્રં ક્વચિન્નાસજ્જત ક્ષણમ્ ॥ ૪૦॥

કાનનાનિ વિચિત્રાણિ પશ્યન્મલયસહ્યયોઃ ।
તે સહ્યં સમતિક્રમ્ય મલયં ચ તથા ગિરિમ્ ॥ ૪૧॥

આયયુશ્ચાનુપૂર્વ્યેણ સમુદ્રં ભીમનિઃસ્વનમ્ ।
અવતીર્ય હનૂમન્તં રામઃ સુગ્રીવસંયુતઃ ॥ ૪૨॥

સલિલાભ્યાશમાસાદ્ય રામો વચનમબ્રવીત્ ।
આગતાઃ સ્મો વયં સર્વે સમુદ્રં મકરાલયમ્ ॥ ૪૩॥

ઇતો ગન્તુમશક્યં નો નિરુપાયેન વાનરાઃ ।
અત્ર સેનાનિવેશોઽસ્તુ મન્ત્રયામોઽસ્ય તારણે ॥ ૪૪॥

શ્રુત્વા રામસ્ય વચનં સુગ્રીવઃ સાગરાન્તિકે ।
સેનાં ન્યવેશયત્ ક્ષિપ્રં રક્ષિતાં કપિકુઞ્જરૈઃ ॥ ૪૫॥

તે પશ્યન્તો વિષેદુસ્તં સાગરં ભીમદર્શનમ્ ।
મહોન્નતતરઙ્ગાઢ્યં ભીમનક્રભયઙ્કરમ્ ॥ ૪૬॥

અગાધં ગગનાકારં સાગરં વીક્ષ્ય દુઃખિતાઃ ।
તરિષ્યામઃ કથં ઘોરં સાગરં વરુણાલયમ્ ॥ ૪૭॥

હન્તવ્યોઽસ્માભિરત્રૈવ રાવણો રાક્ષસાધમઃ ।
ઇતિ ચિન્તાકુલાઃ સર્વે રામપાર્શ્વે વ્યવસ્થિતાઃ ॥ ૪૮॥

રામઃ સીતામનુસ્મૃત્ય દુઃખેન મહતાવૃતઃ ।
વિલપ્ય જાનકીં સીતાં બહુધા કાર્યમાનુષઃ ॥ ૪૯॥

અદ્વિતીયશ્ચિદાત્મૈકઃ પરમાત્મા સનાતનઃ ।
યસ્તુ જાનાતિ રામસ્ય સ્વરૂપં તત્ત્વતો જનઃ ॥ ૫૦॥

તં ન સ્પૃશતિ દુઃખાદિ કિમુતાનન્દમવ્યયમ્ ।
દુઃખહર્ષભયક્રોધલોભમોહમદાદયઃ ॥ ૫૧॥

અજ્ઞાનલિઙ્ગાન્યેતાનિ કુતઃ સન્તિ ચિદાત્મનિ ।
દેહાભિમાનિનો દુઃખં ન દેહસ્ય ચિદાત્મનઃ ॥ ૫૨॥

સમ્પ્રસાદે દ્વયાભાવાત્સુખમાત્રં હિ દૃશ્યતે ।
બુદ્ધ્યાદ્યભાવાત્સંશુદ્ધે દુઃખં તત્ર ન દૃશ્યતે ।
અતો દુઃખાદિકં સર્વં બુદ્ધેરેવ ન સંશયઃ ॥ ૫૩॥

રામઃ પરાત્મા પુરુષઃ પુરાણો
    નિત્યોદિતો નિત્યસુખો નિરીહઃ ।
તથાપિ માયાગુણસઙ્ગતોઽસૌ
    સુખીવ દુઃખીવ વિભાવ્યતેઽબુધૈઃ ॥ ૫૪॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે યુદ્ધકાણ્ડે
પ્રથમઃ સર્ગઃ ॥ ૧॥

## ॥ દ્વિતીયઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
લઙ્કાયાં રાવણો દૃષ્ટ્વા કૃતં કર્મ હનૂમતા ।
દુષ્કરં દૈવતૈર્વાઽપિ હ્રિયા કિઞ્ચિદવાઙ્મુખઃ ॥ ૧॥

આહૂય મન્ત્રિણઃ સર્વાનિદં વચનમબ્રવીત્ ।
હનૂમતા કૃતં કર્મ ભવદ્ભિર્દૃષ્ટમેવ તત્ ॥ ૨॥

પ્રવિશ્ય લઙ્કાં દુર્ધર્ષાં દૃષ્ટ્વા સીતાં દુરાસદામ્ ।
હત્વા ચ રાક્ષસાન્ વીરાનક્ષં મન્દોદરીસુતમ્ ॥ ૩॥

દગ્ધ્વા લઙ્કામશેષેણ લઙ્ઘયિત્વા ચ સાગરમ્ ।
યુષ્માન્ સર્વાનતિક્રમ્ય સ્વસ્થોઽગાત્પુનરેવ સઃ ॥ ૪॥

કિં કર્તવ્યમિતોઽસ્માભિર્યૂયં મન્ત્રવિશારદાઃ ।
મન્ત્રયધ્વં પ્રયત્નેન યત્કૃતં મે હિતં ભવેત્ ॥ ૫॥

રાવણસ્ય વચઃ શ્રુત્વા રાક્ષસાસ્તમથાબ્રુવન્ ।
દેવ શઙ્કા કુતો રામાત્તવ લોકજિતો રણે ॥ ૬॥

ઇન્દ્રસ્તુ બદ્ધ્વા નિક્ષિપ્તઃ પુત્રેણ તવ પત્તને ।

જિત્વા કુબેરમાનીય પુષ્પકં ભુજ્યતે ત્વયા ॥ ૭॥

યમો જિતઃ કાલદણ્ડાદ્ભયં નાભૂત્તવ પ્રભો ।
વરુણો હુઙ્કૃતેનૈવ જિતઃ સર્વેઽપિ રાક્ષસાઃ ॥ ૮॥

મયો મહાસુરો ભીત્યા કન્યાં દત્ત્વા સ્વયં તવ ।
ત્વદ્વશે વર્તતેઽદ્યાપિ કિમુતાન્યે મહાસુરાઃ ॥ ૯॥

હનૂમદ્ધર્ષણં યત્તુ તદવજ્ઞાકૃતં ચ નઃ ।
વાનરોઽયં કિમસ્માકમસ્મિન્ પૌરુષદર્શને ॥ ૧૦॥

ઇત્યુપેક્ષિતમસ્માભિર્ધર્ષણં તેન કિં ભવેત્ ।
વયં પ્રમત્તાઃ કિં તેન વઞ્ચિતાઃ સ્મો હનૂમતા ॥ ૧૧॥

જાનીમો યદિ તં સર્વે કથં જીવન્ ગમિષ્યતિ ।
આજ્ઞાપય જગત્કૃત્સ્નમવાનરમમાનુષમ્ ॥ ૧૨॥

કૃત્વાયાસ્યામહે સર્વે પ્રત્યેકં વા નિયોજય ।
કુમ્ભકર્ણસ્તદા પ્રાહ રાવણં રાક્ષસેશ્વરમ્ ॥ ૧૩॥

આરબ્ધં યત્ત્વયા કર્મ સ્વાત્મનાશાય કેવલમ્ ।
ન દૃષ્ટોઽસિ તદા ભાગ્યાત્ત્વં રામેણ મહાત્મના ॥ ૧૪॥

યદિ પશ્યતિ રામસ્ત્વાં જીવન્નાયાસિ રાવણ ।
રામો ન માનુષો દેવઃ સાક્ષાન્નારાયણોઽવ્યયઃ ॥ ૧૫॥

સીતા ભગવતી લક્ષ્મી રામપત્ની યશસ્વિની ।
રાક્ષસાનાં વિનાશાય ત્વયાનીતા સુમધ્યમા ॥ ૧૬॥

વિષપિણ્ડમિવાગીર્ય મહામીનો યથા તથા ।
આનીતા જાનકી પશ્ચાત્ત્વયા કિં વા ભવિષ્યતિ ॥ ૧૭॥

યદ્યપ્યનુચિતં કર્મ ત્વયા કૃતમજાનતા ।
સર્વં સમં કરિષ્યામિ સ્વસ્થચિત્તો ભવ પ્રભો ॥ ૧૮॥

કુમ્ભકર્ણવચઃ શ્રુત્વા વાક્યમિન્દ્રજિદબ્રવીત્ ।
દેહિ દેવ મમાનુજ્ઞાં હત્વા રામં સલક્ષ્મણમ્ ।
સુગ્રીવં વાનરાંશ્ચૈવ પુનર્યાસ્યામિ તેઽન્તિકમ્ ॥ ૧૯॥

તત્રાગતો ભાગવતપ્રધાનો
    વિભીષણો બુદ્ધિમતાં વરિષ્ઠઃ ।

શ્રીરામપાદદ્વય એકતાનઃ ।
પ્રણમ્ય દેવારિમુપોપવિષ્ટઃ ॥ ૨૦॥

વિલોક્ય કુમ્ભશ્રવણાદિદૈત્યાન્
મત્તપ્રમત્તાનતિવિસ્મયેન ।
વિલોક્ય કામાતુરમપ્રમત્તો
દશાનનં પ્રાહ વિશુદ્ધબુદ્ધિઃ ॥ ૨૧॥

ન કુમ્ભકર્ણેન્દ્રજિતૌ ચ રાજન્
તથા મહાપાર્શ્વમહોદરૌ તૌ ।
નિકુમ્ભકુમ્ભૌ ચ તથાતિકાયઃ
સ્થાતું ન શક્તા યુધિ રાઘવસ્ય ॥ ૨૨॥

સીતાભિધાનેન મહાગ્રહેણ
ગ્રસ્તોઽસિ રાજન્ ન ચ તે વિમોક્ષઃ ।
તામેવ સત્કૃત્ય મહાધનેન
દત્ત્વાભિરામાય સુખી ભવ ત્વમ્ ॥ ૨૩॥

યાવન્ન રામસ્ય શિતાઃ શિલીમુખા
લઙ્કામભિવ્યાપ્ય શિરાંસિ રક્ષસામ્ ।
છિન્દન્તિ તાવદ્રઘુનાયકસ્ય ભો-
સ્તાં જાનકીં ત્વં પ્રતિદાતુમર્હસિ ॥ ૨૪॥

યાવન્નગાભાઃ કપયો મહાબલા
હરીન્દ્રતુલ્યા નખદંષ્ટ્રયોધિનઃ ।
લઙ્કાં સમાક્રમ્ય વિનાશયન્તિ તે
તાવદ્દ્રુતં દેહિ રઘૂત્તમાય તામ્ ॥ ૨૫॥

જીવન્ન રામેણ વિમોક્ષ્યસે ત્વં
ગુપ્તઃ સુરેન્દ્રૈરપિ શઙ્કરેણ ।
ન દેવરાજાઙ્કગતો ન મૃત્યોઃ
પાતાલલોકાનપિ સમ્પ્રવિષ્ટઃ ॥ ૨૬॥

શુભં હિતં પવિત્રં ચ વિભીષણવચઃ ખલઃ ।
પ્રતિજગ્રાહ નૈવાસૌ મ્રિયમાણ ઇવૌષધમ્ ॥ ૨૭॥

કાલેન નોદિતો દૈત્યો વિભીષણમથાબ્રવીત્ ।

મદ્દત્તભોગૈઃ પુષ્ટાઙ્ગો મત્સમીપે વસન્નપિ ॥ ૨૮॥

પ્રતીપમાચરત્યેષ મમૈવ હિતકારિણઃ ।
મિત્રભાવેન શત્રુર્મે જાતો નાસ્ત્યત્ર સંશયઃ ॥ ૨૯॥

અનાર્યેણ કૃતઘ્નેન સઙ્ગતિર્મે ન યુજ્યતે ।
વિનાશમભિકાઙ્ક્ષન્તિ જ્ઞાતીનાં જ્ઞાતયઃ સદા ॥ ૩૦॥

યોઽન્યસ્ત્વેવંવિધં બ્રૂયાદ્વાક્યમેકં નિશાચરઃ ।
હન્મિ તસ્મિન્ ક્ષણે એવ ધિક્ ત્વાં રક્ષઃકુલાધમમ્ ॥ ૩૧॥

રાવણેનૈવમુક્તઃ સન્ પરુષં સ વિભીષણઃ ।
ઉત્પપાત સભામધ્યાદ્ગદાપાણિર્મહાબલઃ ॥ ૩૨॥

ચતુર્ભિર્મન્ત્રિભિઃ સાર્ધં ગગનસ્થોઽબ્રવીદ્વચઃ ।
ક્રોધેન મહતાવિષ્ટો રાવણં દશકન્ધરમ્ ।
મા વિનાશમુપૈહિ ત્વં પ્રિયવાદિનમેવ મામ્ ॥ ૩૩॥

ધિક્કરોષિ તથાપિ ત્વં જ્યેષ્ઠો ભ્રાતા પિતુઃ સમઃ ।
કાલો રાઘવરૂપેણ જાતો દશરથાલયે ॥ ૩૪॥

કાલી સીતાભિધાનેન જાતા જનકનન્દિની ।
તાવુભાવાગતાવત્ર ભૂમેર્ભારાપનુત્તયે ॥ ૩૫॥

તેનૈવ પ્રેરિતસ્ત્વં તુ ન શ‍ૃણોષિ હિતં મમ ।
શ્રીરામઃ પ્રકૃતેઃ સાક્ષાત્પરસ્તાત્સર્વદા સ્થિતઃ ॥ ૩૬॥

બહિરન્તશ્ચ ભૂતાનાં સમઃ સર્વત્ર સંસ્થિતઃ ।
નામરૂપાદિભેદેન તત્તન્મય ઇવામલઃ ॥ ૩૭॥

યથા નાનાપ્રકારેષુ વૃક્ષેષ્વેકો મહાનલઃ ।
તત્તદાકૃતિભેદેન ભિદ્યતેઽજ્ઞાનચક્ષુષામ્ ॥ ૩૮॥

પઞ્ચકોશાદિભેદેન તત્તન્મય ઇવાબભૌ ।
નીલપીતાદિયોગેન નિર્મલઃ સ્ફટિકો યથા ॥ ૩૯॥

સ એવ નિત્યમુક્તોઽપિ સ્વમાયાગુણબિમ્બિતઃ ।
કાલઃ પ્રધાનં પુરુષોઽવ્યક્તં ચેતિ ચતુર્વિધઃ ॥ ૪૦॥

પ્રધાનપુરુષાભ્યાં સ જગત્કૃત્સ્નં સૃજત્યજઃ ।
કાલરૂપેણ કલનાં જગતઃ કુરુતેઽવ્યયઃ ॥ ૪૧॥

કાલરૂપી સ ભગવાન્ રામરૂપેણ માયયા ॥ ૪૨॥

બ્રહ્મણા પ્રાર્થિતો દેવસ્ત્વદ્વધાર્થમિહાગતઃ ।
તદન્યથા કથં કુર્યાત્સત્યસઙ્કલ્પ ઈશ્વરઃ ॥ ૪૩॥

હનિષ્યતિ ત્વાં રામસ્તુ સપુત્રબલવાહનમ્ ।
હન્યમાનં ન શક્નોમિ દ્રષ્ટું રામેણ રાવણ ॥ ૪૪॥

ત્વાં રાક્ષસકુલં કૃત્સ્નં તતો ગચ્છામિ રાઘવમ્ ।
મયિ યાતે સુખીભૂત્વા રમસ્વ ભવને ચિરમ્ ॥ ૪૫॥

વિભીષણો રાવણવાક્યતઃ ક્ષણા-
        દ્વિસૃજ્ય સર્વં સપરિચ્છદં ગૃહમ્ ।
જગામ રામસ્ય પદારવિન્દયોઃ
સેવાભિકાઙ્ક્ષી પરિપૂર્ણમાનસઃ ॥ ૪૬॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે યુદ્ધકાણ્ડે દ્વિતીયઃ
સર્ગઃ ॥ ૨॥

## ॥ તૃતીયઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
વિભીષણો મહાભાગશ્ચતુર્ભિર્મન્ત્રિભિઃ સહ ।
આગત્ય ગગને રામસમ્મુખે સમવસ્થિતઃ ॥ ૧॥

ઉચ્ચૈરુવાચ ભોઃ સ્વામિન્ રામ રાજીવલોચન ।
રાવણસ્યાનુજોઽહં તે દારહર્તુર્વિભીષણઃ ॥ ૨॥

નામ્ના ભ્રાત્રા નિરસ્તોઽહં ત્વામેવ શરણં ગતઃ ।
હિતમુક્તં મયા દેવ તસ્ય ચાવિદિતાત્મનઃ ॥ ૩॥

સીતાં રામાય વૈદેહીં પ્રેષયેતિ પુનઃ પુનઃ ।
ઉક્તોઽપિ ન શૃણોત્યેવ કાલપાશવશં ગતઃ ॥ ૪॥

હન્તું માં ખડ્ગમાદાય પ્રાદ્રવદ્રાક્ષસાધમઃ ।
તતોઽચિરેણ સચિવૈશ્ચતુર્ભિઃ સહિતો ભયાત્ ॥ ૫॥

ત્વામેવ ભવમોક્ષાય મુમુક્ષુઃ શરણં ગતઃ ।
વિભીષણવચઃ શ્રુત્વા સુગ્રીવો વાક્યમબ્રવીત્ ॥ ૬॥

વિશ્વાસાર્હો ન તે રામ માયાવી રાક્ષસાધમઃ ।
સીતાહર્તુર્વિશેષેણ રાવણસ્યાનુજો બલી ॥ ૭॥

મન્ત્રિભિઃ સાયુધૈરસ્માન્ વિવરે નિહનિષ્યતિ ।
તદાજ્ઞાપય મે દેવ વાનરૈર્હન્યતામયમ્ ॥ ૮॥

મમૈવં ભાતિ મે રામ બુદ્ધ્યા કિં નિશ્ચિતં વદ ।
શ્રુત્વા સુગ્રીવવચનં રામઃ સસ્મિતમબ્રવીત્ ॥ ૯॥

યદીચ્છામિ કપિશ્રેષ્ઠ લોકાન્ સર્વાન્ સહેશ્વરાન્ ।
નિમિષાર્ધેન સંહન્યાં સૃજામિ નિમિષાર્ધતઃ ॥ ૧૦॥

અતો મયાઽભયં દત્તં શીઘ્રમાનય રાક્ષસમ્ ॥ ૧૧॥

સકૃદેવ પ્રપન્નાય તવાસ્મીતિ ચ યાચતે ।
અભયં સર્વભૂતેભ્યો દદામ્યેતદ્વ્રતં મમ ॥ ૧૨॥

રામસ્ય વચનં શ્રુત્વા સુગ્રીવો હૃષ્ટમાનસઃ ।
વિભીષણમથાનાય્ય દર્શયામાસ રાઘવમ્ ॥ ૧૩॥

વિભીષણસ્તુ સાષ્ટાઙ્ગં પ્રણિપત્ય રઘૂત્તમમ્ ।
હર્ષગદ્ગદયા વાચા ભક્ત્યા ચ પરયાન્વિતઃ ॥ ૧૪॥

રામં શ્યામં વિશાલાક્ષં પ્રસન્નમુખપઙ્કજમ્ ।
ધનુર્બાણધરં શાન્તં લક્ષ્મણેન સમન્વિતમ્ ॥ ૧૫॥

કૃતાઞ્જલિપુટો ભૂત્વા સ્તોતું સમુપચક્રમે ॥ ૧૬॥

વિભીષણ ઉવાચ ।
નમસ્તે રામ રાજેન્દ્ર નમઃ સીતામનોરમ ।
નમસ્તે ચણ્ડકોદણ્ડ નમસ્તે ભક્તવત્સલ ॥ ૧૭॥

નમોઽનન્તાય શાન્તાય રામાયામિતતેજસે ।
સુગ્રીવમિત્રાય ચ તે રઘૂણાં પતયે નમઃ ॥ ૧૮॥

જગદુત્પત્તિનાશાનાં કારણાય મહાત્મને ।
ત્રૈલોક્યગુરવેઽનાદિગૃહસ્થાય નમો નમઃ ॥ ૧૯॥

ત્વમાદિર્જગતાં રામ ત્વમેવ સ્થિતિકારણમ્ ।
ત્વમન્તે નિધનસ્થાનં સ્વેચ્છાચારસ્ત્વમેવ હિ ॥ ૨૦॥

ચરાચરાણાં ભૂતાનાં બહિરન્તશ્ચ રાઘવ ।
વ્યાપ્યવ્યાપકરૂપેણ ભવાન્ ભાતિ જગન્મયઃ ॥૨૧॥

ત્વન્માયયા હૃતજ્ઞાના નષ્ટાત્માનો વિચેતસઃ ।
ગતાગતં પ્રપદ્યન્તે પાપપુણ્યવશાત્સદા ॥ ૨૨॥

તાવત્સત્યં જગદ્ભાતિ શુક્તિકારજતં યથા ।
યાવન્ન જ્ઞાયતે જ્ઞાનં ચેતસાનન્યગામિના ॥૨૩॥

ત્વદજ્ઞાનાત્સદા યુક્તાઃ પુત્રદારગૃહાદિષુ ।
રમન્તે વિષયાન્ સર્વાનન્તે દુઃખપ્રદાન્ વિભો ॥ ૨૪॥

ત્વમિન્દ્રોઽગ્નિર્યમો રક્ષો વરુણશ્ચ તથાનિલઃ ।
કુબેરશ્ચ તથા રુદ્રસ્ત્વમેવ પુરુષોત્તમ ॥ ૨૫॥

ત્વમણોરપ્યણીયાંશ્ચ સ્થૂલાત્ સ્થૂલતરઃ પ્રભો ।
ત્વં પિતા સર્વલોકાનાં માતા ધાતા ત્વમેવ હિ ॥ ૨૬॥

આદિમધ્યાન્તરહિતઃ પરિપૂર્ણોઽચ્યુતોઽવ્યયઃ ।
ત્વં પાણિપાદરહિતશ્ચક્ષુઃશ્રોત્રવિવર્જિતઃ ॥ ૨૭॥

શ્રોતા દ્રષ્ટા ગ્રહીતા ચ જવનસ્ત્વં ખરાન્તક ।
કોશેભ્યો વ્યતિરિક્તસ્ત્વં નિર્ગુણો નિરુપાશ્રયઃ ॥ ૨૮॥

નિર્વિકલ્પો નિર્વિકારો નિરાકારો નિરીશ્વરઃ ।
ષડ્ભાવરહિતોઽનાદિઃ પુરુષઃ પ્રકૃતેઃ પરઃ ॥ ૨૯॥

માયયા ગૃહ્યમાણસ્ત્વં મનુષ્ય ઇવ ભાવ્યસે ।
જ્ઞાત્વા ત્વાં નિર્ગુણમજં વૈષ્ણવા મોક્ષગામિનઃ ॥ ૩૦॥

અહં ત્વત્પાદસદ્ભક્તિનિઃશ્રેણીં પ્રાપ્ય રાઘવ ।
ઇચ્છામિ જ્ઞાનયોગાખ્યં સૌધમારોઢુમીશ્વર ॥ ૩૧॥

નમઃ સીતાપતે રામ નમઃ કારુણિકોત્તમ ।
રાવણારે નમસ્તુભ્યં ત્રાહિ માં ભવસાગરાત્ ॥ ૩૨॥

તતઃ પ્રસન્નઃ પ્રોવાચ શ્રીરામો ભક્તવત્સલઃ ।
વરં વૃણીષ્વ ભદ્રં તે વાઞ્છિતં વરદોઽસ્મ્યહમ્ ॥ ૩૩॥

વિભીષણ ઉવાચ ।
ધન્યોઽસ્મિ કૃતકૃત્યોઽસ્મિ કૃતકાર્યોઽસ્મિ રાઘવ ।
ત્વત્પાદદર્શનાદેવ વિમુક્તોઽસ્મિ ન સંશયઃ ॥ ૩૪॥

નાસ્તિ મત્સદૃશો ધન્યો નાસ્તિ મત્સદૃશઃ શુચિઃ ।
નાસ્તિ મત્સદૃશો લોકે રામ ત્વન્મૂર્તિદર્શનાત્ ॥ ૩૫॥

કર્મબન્ધવિનાશાય ત્વજ્જ્ઞાનં ભક્તિલક્ષણમ્ ।
ત્વદ્ધ્યાનં પરમાર્થં ચ દેહિ મે રઘુનન્દન ॥ ૩૬॥

ન યાચે રામ રાજેન્દ્ર સુખં વિષયસમ્ભવમ્ ।
ત્વત્પાદકમલે સક્તા ભક્તિરેવ સદાસ્તુ મે ॥ ૩૭॥

ઓમિત્યુક્ત્વા  પુનઃ પ્રીતો રામઃ પ્રોવાચ રાક્ષસમ્ ।
શ‍ૃણુ વક્ષ્યામિ તે ભદ્રં રહસ્યં મમ નિશ્ચિતમ્ ॥ ૩૮॥

મદ્ભક્તાનાં પ્રશાન્તાનાં યોગિનાં વીતરાગિણામ્ ।
હૃદયે સીતયા નિત્યં વસામ્યત્ર ન સંશયઃ ॥ ૩૯॥

તસ્માત્ત્વં સર્વદા શાન્તઃ સર્વકલ્મષવર્જિતઃ ।
માં ધ્યાત્વા મોક્ષ્યસે નિત્યં ઘોરસંસારસાગરાત્ ॥ ૪૦॥

સ્તોત્રમેતત્પઠેદ્યસ્તુ લિખેદ્યઃ શ‍ૃણુયાદપિ ।
મત્પ્રીતયે મમાભીષ્ટં સારૂપ્યં સમવાપ્નુયાત્ ॥ ૪૧॥

ઇત્યુક્ત્વા લક્ષ્મણં પ્રાહ શ્રીરામો ભક્તભક્તિમાન્ ।
પશ્યત્વિદાનીમેવૈષ મમ સન્દર્શને ફલમ્ ॥ ૪૨॥

લઙ્કારાજ્યેઽભિષેક્ષ્યામિ જલમાનય સાગરાત્ ।
યાવચ્ચન્દ્રશ્ચ સૂર્યશ્ચ યાવત્તિષ્ઠતિ મેદિની ॥ ૪૩॥

યાવન્મમ કથા લોકે તાવદ્રાજ્યં કરોત્વસૌ ।
ઇત્યુક્ત્વા લક્ષ્મણેનામ્બુ હ્યાનાય્ય કલશેન તમ્ ॥ ૪૪॥

લઙ્કારાજ્યાધિપત્યાર્થમભિષેકં રમાપતિઃ ।
કારયામાસ સચિવૈર્લક્ષ્મણેન વિશેષતઃ ॥ ૪૫॥

સાધુ સાધ્વિતિ તે સર્વે વાનરાસ્તુષ્ટુવુર્ભૃશમ્ ।
સુગ્રીવોઽપિ પરિષ્વજ્ય વિભીષણમથાબ્રવીત્ ॥ ૪૬॥

વિભીષણ વયં સર્વે રામસ્ય પરમાત્મનઃ ।
કિઙ્કુરાસ્તત્ર મુખ્યસ્ત્વં ભક્ત્યા રામપરિગ્રહાત્ ।
રાવણસ્ય વિનાશે ત્વં સાહાય્યં કર્તુમર્હસિ ॥ ૪૭॥

વિભીષણ ઉવાચ ।
અહં કિયાન્ સહાયત્વે રામસ્ય પરમાત્મનઃ ।
કિં તુ દાસ્યં કરિષ્યેઽહં ભક્ત્યા શક્ત્યા હ્યમાયયા ॥ ૪૮॥

દશગ્રીવેણ સન્દિષ્ટઃ શુકો નામ મહાસુરઃ ।
સંસ્થિતો હ્યમ્બરે વાક્યં સુગ્રીવમિદમબ્રવીત્ ॥ ૪૯॥

ત્વામાહ રાવણો રાજા ભ્રાતરં રાક્ષસાધિપઃ ।
મહાકુલપ્રસૂતસ્ત્વં રાજાસિ વનચારિણામ્ ॥ ૫૦॥

મમ ભ્રાતૃસમાનસ્ત્વં તવ નાસ્ત્યર્થવિપ્લવઃ ।
અહં યદહરં ભાર્યાં રાજપુત્રસ્ય કિં તવ ॥ ૫૧॥

કિષ્કિન્ધાં યાહિ હરિભિર્લઙ્કા શક્યા ન દૈવતૈઃ ।
પ્રાપ્તું કિં માનવૈરલ્પસત્ત્વૈર્વાનરયૂથપૈઃ ॥ ૫૨॥

તં પ્રાપયન્તં વચનં તૂર્ણમુત્પ્લુત્ય વાનરાઃ ।
પ્રાપદ્યન્ત તદા ક્ષિપ્રં નિહન્તું દૃઢમુષ્ટિભિઃ ॥ ૫૩॥

વાનરૈર્હન્યમાનસ્તુ શુકો રામમથાબ્રવીત્ ।
ન દૂતાન્ ઘ્નન્તિ રાજેન્દ્ર વાનરાન્ વારય પ્રભો ॥ ૫૪॥

રામઃ શ્રુત્વા તદા વાક્યં શુકસ્ય પરિદેવિતમ્ ।
મા વધિષ્ટેતિ રામસ્તાન્ વારયામાસ વાનરાન્ ॥ ૫૫॥

પુનરમ્બરમાસાદ્ય શુકઃ સુગ્રીવમબ્રવીત્ ।
બ્રૂહિ રાજન્ દશગ્રીવં કિં વક્ષ્યામિ વ્રજામ્યહમ્ ॥ ૫૬॥

સુગ્રીવ ઉવાચ ।
યથા વાલી મમ ભ્રાતા તથા ત્વં રાક્ષસાધમ ।
હન્તવ્યસ્ત્વં મયા યત્નાત્સપુત્રબલવાહનઃ ॥ ૫૭॥

બ્રૂહિ મે રામચન્દ્રસ્ય ભાર્યાં હૃત્વા ક્વ યાસ્યસિ ।
તતો રામાજ્ઞયા ધૃત્વા શુકં બધ્વાન્વરક્ષયત્ ॥ ૫૮॥

શાર્દૂલોઽપિ તતઃ પૂર્વં દૃષ્ટ્વા કપિબલં મહત્ ।

યથાવત્કથયામાસ રાવણાય સ રાક્ષસઃ ॥ ૫૯॥

દીર્ઘચિન્તાપરો ભૂત્વા નિઃશ્વસન્નાસ મન્દિરે ।
તતઃ સમુદ્રમાવેક્ષ્ય રામો રક્તાન્તલોચનઃ ॥ ૬૦॥

પશ્ય લક્ષ્મણ દુષ્ટોઽસૌ વારિધિર્મામુપાગતમ્ ।
નાભિનન્દતિ દુષ્ટાત્મા દર્શનાર્થં મમાનઘ ॥ ૬૧॥

જાનાતિ માનુષોઽયં મે કિં કરિષ્યતિ વાનરૈઃ ।
અદ્ય પશ્ય મહાબાહો શોષયિષ્યામિ વારિધિમ્ ॥ ૬૨॥

પાદેનૈવ ગમિષ્યન્તિ વાનરા વિગતજ્વરાઃ ।
ઇત્યુક્ત્વા ક્રોધતામ્રાક્ષ આરોપિતધનુર્ધરઃ ॥ ૬૩॥

તૂણીરાદ્બાણમાદાય કાલાગ્નિસદૃશપ્રભમ્ ।
સન્ધાય ચાપમાકૃષ્ય રામો વાક્યમથાબ્રવીત્ ॥ ૬૪॥

પશ્યન્તુ સર્વભૂતાનિ રામસ્ય શરવિક્રમમ્ ।
ઇદાનીં ભસ્મસાત્કુર્યાં સમુદ્રં સરિતાં પતિમ્ ॥ ૬૫॥

એવં બ્રુવતિ રામે તુ સશૈલવનકાનના ।
ચચાલ વસુધા દ્યૌશ્ચ દિશશ્ચ તમસાવૃતાઃ ॥ ૬૬॥

ચુક્ષુભે સાગરો વેલાં ભયાદ્યોજનમત્યગાત્ ।
તિમિનક્રઝષા મીનાઃ પ્રતપ્તાઃ પરિતત્રસુઃ ॥ ૬૭॥

એતસ્મિન્નન્તરે સાક્ષાત્સાગરો દિવ્યરૂપધૃક્ ।
દિવ્યાભરણસમ્પન્નઃ સ્વભાસા ભાસયન્ દિશઃ ॥ ૬૮॥

સ્વાન્તઃસ્થદિવ્યરત્નાનિ કરાભ્યાં પરિગૃહ્ય સઃ ।
પાદયોઃ પુરતઃ ક્ષિપ્ત્વા રામસ્યોપાયનં બહુ ॥ ૬૯॥

દણ્ડવત્પ્રણિપત્યાહ રામં રક્તાન્તલોચનમ્ ।
ત્રાહિ ત્રાહિ જગન્નાથ રામ ત્રૈલોક્યરક્ષક ॥ ૭૦॥

જડોઽહં રામ તે સૃષ્ટઃ સૃજતા નિખિલં જગત્ ।
સ્વભાવમન્યથા કર્તું કઃ શક્તો દેવનિર્મિતમ્ ॥ ૭૧॥

સ્થૂલાનિ પઞ્ચભૂતાનિ જડાન્યેવ સ્વભાવતઃ ।
સૃષ્ટાનિ ભવતૈતાનિ ત્વદાજ્ઞાં લઙ્ઘયન્તિ ન ॥ ૭૨॥

તામસાદહમો રામ ભૂતાનિ પ્રભવન્તિ હિ ।
કારણાનુગમાત્તેષાં જડત્વં તામસં સ્વતઃ ॥ ૭૩॥

નિર્ગુણસ્ત્વં નિરાકારો યદા માયાગુણાન્ પ્રભો ।
લીલયાઙ્ગીકરોષિ ત્વં તદા વૈરાજનામવાન્ ॥ ૭૪॥

ગુણાત્મનો વિરાજશ્ચ સત્ત્વાદ્દેવા બભૂવિરે ।
રજોગુણાત્પ્રજેશાદ્યા મન્વોર્ભૂતપતિસ્તવ ॥ ૭૫॥

ત્વામહં માયયા છન્નં લીલયા માનુષાકૃતિમ્ ॥ ૭૬॥

જડબુદ્ધિર્જડો મૂર્ખઃ કથં જાનામિ નિર્ગુણમ્ ।
દણ્ડ એવ હિ મૂર્ખાણાં સન્માર્ગપ્રાપકઃ પ્રભો ॥ ૭૭॥

ભૂતાનામમરશ્રેષ્ઠ પશૂનાં લગુડો યથા ।
શરણં તે વ્રજામીશં શરણ્યં ભક્તવત્સલ ।
અભયં દેહિ મે રામ લઙ્કામાર્ગં દદામિ તે ॥ ૭૮॥

શ્રીરામ ઉવાચ ।
અમોઘોઽયં મહાબાણઃ કસ્મિન્ દેશે નિપાત્યતામ્ ।
લક્ષ્યં દર્શય મે શીઘ્રં બાણસ્યામોઘપાતિનઃ ॥ ૭૯॥

રામસ્ય વચનં શ્રુત્વા કરે દૃષ્ટ્વા મહાશરમ્ ।
મહોદધિર્મહાતેજા રાઘવં વાક્યમબ્રવીત્ ॥ ૮૦॥

રામોત્તરપ્રદેશે તુ દ્રુમકુલ્ય ઇતિ શ્રુતઃ ।
પ્રદેશસ્તત્ર બહવઃ પાપાત્માનો દિવાનિશમ્ ॥ ૮૧॥

બાધન્તે માં રઘુશ્રેષ્ઠ તત્ર તે પાત્યતાં શરઃ ।
રામેણ સૃષ્ટો બાણસ્તુ ક્ષણાદાભીરમણ્ડલમ્ ॥ ૮૨॥

હત્વા પુનઃ સમાગત્ય તૂણીરે પૂર્વવત્સ્થિતઃ ।
તતોઽબ્રવીદ્રઘુશ્રેષ્ઠં સાગરો વિનયાન્વિતઃ ॥ ૮૩॥

નલઃ સેતું કરોત્વસ્મિન્ જલે મે વિશ્વકર્મણઃ ।
સુતો ધીમાન્ સમર્થોઽસ્મિન્ કાર્યે લબ્ધવરો હરિઃ ॥ ૮૪॥

કીર્તિં જાનન્તુ તે લોકાઃ સર્વલોકમલાપહામ્ ।
ઇત્યુક્ત્વા રાઘવં નત્વા યયૌ સિન્ધુરદૃશ્યતામ્ ॥ ૮૫॥

તતો રામસ્તુ સુગ્રીવલક્ષ્મણાભ્યાં સમન્વિતઃ ।

નલમાજ્ઞાપયચ્છીઘ્રં વાનરૈઃ સેતુબન્ધને ॥ ૮૬॥

તતોઽતિહૃષ્ટઃ પ્લવગેન્દ્રયૂથપૈ-
    ર્મહાનગેન્દ્રપ્રતિમૈર્યુતો નલઃ ।
બબન્ધ સેતું શતયોજનાયતં
    સુવિસ્તૃતં પર્વતપાદપૈર્દૃઢમ્ ॥ ૮૭॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે યુદ્ધકાણ્ડે
તૃતીયઃ સર્ગઃ ॥ ૩॥

## ॥ ચતુર્થઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
સેતુમારભમાણસ્તુ તત્ર રામેશ્વરં શિવમ્ ।
સંસ્થાપ્ય પૂજયિત્વાહ રામો લોકહિતાય ચ ॥ ૧॥

પ્રણમેત્સેતુબન્ધં યો દૃષ્ટ્વા રામેશ્વરં શિવમ્ ।
બ્રહ્મહત્યાદિપાપેભ્યો મુચ્યતે મદનુગ્રહાત્ ॥ ૨॥

સેતુબન્ધે નરઃ સ્નાત્વા દૃષ્ટ્વા રામેશ્વરં હરમ્ ।
સઙ્કલ્પનિયતો ભૂત્વા ગત્વા વારાણસીં નરઃ ॥ ૩॥

આનીય ગઙ્ગાસલિલં રામેશમભિષિચ્ય ચ ।
સમુદ્રે ક્ષિપ્તતદ્ભારો બ્રહ્મ પ્રાપ્નોત્યસંશયમ્ ॥ ૪॥

કૃતાનિ પ્રથમેનાહ્ના યોજનાનિ ચતુર્દશ ।
દ્વિતીયેન તથા ચાહ્ના યોજનાનિ તુ વિંશતિઃ ॥ ૫॥

તૃતીયેન તથા ચાહ્ના યોજનાન્યેકવિંશતિઃ ।
ચતુર્થેન તથા ચાહ્ના દ્વાવિંશતિરિતિ શ્રુતમ્ ॥ ૬॥

પઞ્ચમેન ત્રયોવિંશદ્યોજનાનિ સમન્તતઃ ।
બબન્ધ સાગરે સેતું નલો વાનરસત્તમઃ ॥ ૭॥

તેનૈવ જગ્મુઃ કપયો યોજનાનાં શતં દ્રુતમ્ ।
અસઙ્ખ્યાતાઃ સુવેલાદ્રિં રુરુધુઃ પ્લવગોત્તમાઃ ॥ ૮॥

આરુહ્ય મારુતિં રામો લક્ષ્મણોઽપ્યઙ્ગદં તથા ।

દિદૃક્ષૂ રાઘવો લઙ્કામારુરોહાચલં મહત્ ॥ ૯॥

દૃષ્ટ્વા લઙ્કાં સુવિસ્તીર્ણાં નાનાચિત્રધ્વજાકુલામ્ ।
ચિત્રપ્રાસાદસમ્બાધાં સ્વર્ણપ્રાકારતોરણામ્ ॥ ૧૦॥

પરિખાભિઃ શતઘ્નીભિઃ સઙ્ક્રમૈશ્ચ વિરાજિતામ્ ।
પ્રાસાદોપરિ વિસ્તીર્ણપ્રદેશે દશકન્ધરઃ ॥૧૧॥

મન્ત્રિભિઃ સહિતો વીરૈઃ કિરીટદશકોજ્જ્વલઃ ।
નીલાદ્રિશિખરાકારઃ કાલમેઘસમપ્રભઃ ॥૧૨॥

રત્નદણ્ડૈઃ સિતચ્છત્રૈરનેકૈઃ પરિશોભિતઃ ।
એતસ્મિન્નન્તરે બદ્ધો મુક્તો રામેણ વૈ શુકઃ ॥ ૧૩॥

વાનરૈસ્તાડિતઃ સમ્યગ્ દશાનનમુપાગતઃ ।
પ્રહસન્ રાવણઃ પ્રાહ પીડિતઃ કિં પરૈઃ શુક ॥૧૪॥

રાવણસ્ય વચઃ શ્રુત્વા શુકો વચનમબ્રવીત્ ।
સાગરસ્યોત્તરે તીરેઽબ્રવં તે વચનં યથા ।
તત ઉત્પ્લુત્ય કપયો ગૃહીત્વા માં ક્ષણાત્તતઃ ॥ ૧૫॥

મુષ્ટિભિર્નખદન્તૈશ્ચ હન્તું લોમું પ્રચક્રમુઃ ।
તતો માં રામ રક્ષેતિ ક્રોશન્તં રઘુપુઙ્ગવઃ ॥ ૧૬॥

વિસૃજ્યતામિતિ પ્રાહ વિસૃષ્ટોઽહં કપીશ્વરૈઃ ।
તતોઽહમાગતો ભીત્યા દૃષ્ટ્વા તદ્વાનરં બલમ્ ॥ ૧૭॥

રાક્ષસાનાં બલૌઘસ્ય વાનરેન્દ્રબલસ્ય ચ ।
નૈતયોર્વિદ્યતે સન્ધિર્દેવદાનવયોરિવ ॥ ૧૮॥

પુરપ્રાકારમાયાન્તિ ક્ષિપ્રમેકતરં કુરુ ।
સીતાં વાસ્મૈ પ્રયચ્છાશુ યુદ્ધં વા દીયતાં પ્રભો ॥૧૯॥

મામાહ રામસ્ત્વં બ્રૂહિ રાવણં મદ્વચઃ શુક ।
યદ્બલં ચ સમાશ્રિત્ય સીતાં મે હૃતવાનસિ ॥ ૨૦॥

તદ્દર્શય યથાકામં સસૈન્યઃ સહબાન્ધવઃ ।
શ્વઃકાલે નગરીં લઙ્કાં સપ્રાકારાં સતોરણામ્ ॥ ૨૧॥

રાક્ષસં ચ બલં પશ્ય શરૈર્વિધ્વંસિતં મયા ।
ઘોરરોષમહં મોક્ષ્યે બલં ધારય રાવણ ॥ ૨૨॥

ઇત્યુક્ત્વોપરરામાથ રામઃ કમલલોચનઃ ।
એકસ્થાનગતા યત્ર ચત્વારઃ પુરુષર્ષભાઃ ॥ ૨૩॥

શ્રીરામો લક્ષ્મણશ્ચૈવ સુગ્રીવશ્ચ વિભીષણઃ ।
એત એવ સમર્થાસ્તે લઙ્કાં નાશયિતું પ્રભો ॥ ૨૪॥

ઉત્પાટ્ય ભસ્મીકરણે સર્વે તિષ્ઠન્તુ વાનરાઃ ।
તસ્ય યાદૃગ્ બલં દૃષ્ટં રૂપં પ્રહરણાનિ ચ ॥ ૨૫॥

વધિષ્યતિ પુરં સર્વમેકસ્તિષ્ઠન્તુ તે ત્રયઃ ।
પશ્ય વાનરસેનાં તામસઙ્ખ્યાતાં પ્રપૂરિતામ્ ॥ ૨૬॥

ગર્જન્તિ વાનરાસ્તત્ર પશ્ય પર્વતસન્નિભાઃ ।
ન શક્યાસ્તે ગણયિતું પ્રાધાન્યેન બ્રવીમિ તે ॥ ૨૭॥

એષ યોઽભિમુખો લઙ્કાં નદંસ્તિષ્ઠતિ વાનરઃ ।
યૂથપાનાં સહસ્રાણાં શતેન પરિવારિતઃ ॥ ૨૮॥

સુગ્રીવસેનાધિપતિર્નીલો નામાગ્નિનન્દનઃ ।
એષ પર્વતશૃઙ્ગાભઃ પદ્મકિઞ્જલ્કસન્નિભઃ ॥ ૨૯॥

સ્ફોટયત્યભિસંરબ્ધો લાઙ્ગૂલં ચ પુનઃ પુનઃ ।
યુવરાજોઽઙ્ગદો નામ વાલિપુત્રોઽતિવીર્યવાન્ ॥ ૩૦॥

યેન દૃષ્ટા જનકજા રામસ્યાતીવવલ્લભા ।
હનૂમાનેષ વિખ્યાતો હતો યેન તવાત્મજઃ ॥ ૩૧॥

શ્વેતો રજતસઙ્કાશો મહાબુદ્ધિપરાક્રમઃ ।
તૂર્ણં સુગ્રીવમાગત્ય પુનર્ગચ્છતિ વાનરઃ ॥ ૩૨॥

યસ્ત્વેષ સિંહસઙ્કાશઃ પશ્યત્યતુલવિક્રમઃ ।
રમ્ભો નામ મહાસત્ત્વો લઙ્કાં નાશયિતું ક્ષમઃ ॥ ૩૩॥

એષ પશ્યતિ વૈ લઙ્કાં દિધક્ષન્નિવ વાનરઃ ।
શરભો નામ રાજેન્દ્ર કોટિયૂથપનાયકઃ ॥ ૩૪॥

પનસશ્ચ મહાવીર્યો મૈન્દશ્ચ દ્વિવિદસ્તથા ।
નલશ્ચ સેતુકર્તાઽસૌ વિશ્વકર્મસુતો બલી ॥ ૩૫॥

વાનરાણાં વર્ણને વા સઙ્ખ્યાને વા ક ઈશ્વરઃ ।

શૂરાઃ સર્વે મહાકાયાઃ સર્વે યુદ્ધાભિકાઙ્ક્ષિણઃ ॥ ૩૬॥

શક્તાઃ સર્વે ચૂર્ણયિતું લઙ્કાં રક્ષોગણૈઃ સહ ।
એતેષાં બલસઙ્ખ્યાનં પ્રત્યેકં વચ્મિ તે શ‍ૃણુ ॥૩૭॥

એષાં કોટિસહસ્રાણિ નવ પઞ્ચ ચ સપ્ત ચ ।
તથા શઙ્ખસહસ્રાણિ  તથાર્બુદશતાનિ ચ ॥ ૩૮॥

સુગ્રીવસચિવાનાં તે બલમેતત્પ્રકીર્તિતમ્ ।
અન્યેષાં તુ બલં નાહં વક્તું શક્તોઽસ્મિ રાવણ ॥૩૯॥

રામો ન માનુષઃ સાક્ષાદાદિનારાયણઃ પરઃ ।
સીતા સાક્ષાજ્જગદ્ધેતુશ્ચિચ્છક્તિર્જગદાત્મિકા ॥ ૪૦॥

તાભ્યામેવ સમુત્પન્નં જગત્સ્થાવરજઙ્ગમમ્ ।
તસ્માદ્રામશ્ચ સીતાચ જગતસ્તસ્થુષશ્ચ તૌ ॥ ૪૧॥

પિતરૌ પૃથિવીપાલ તયોર્વૈરી કથં ભવેત્ ।
અજાનતા ત્વયાનીતા જગન્માતૈવ જાનકી ॥ ૪૨॥

ક્ષણનાશિનિ સંસારે શરીરે ક્ષણભઙ્ગુરે ।
પઞ્ચભૂતાત્મકે રાજંશ્ચતુર્વિંશતિતત્ત્વકે ॥ ૪૩॥

મલમાંસાસ્થિદુર્ગન્ધભૂયિષ્ઠેઽહઙ્કૃતાલયે ।
કૈવાસ્થા વ્યતિરિક્તસ્ય કાયે તવ જડાત્મકે ॥ ૪૪॥   var  કૈવાસ્ય

યત્કૃતે બ્રહ્મહત્યાદિપાતકાનિ કૃતાનિ ચ ।
ભોગભોક્તા તુ યો દેહઃ સ દેહોઽત્ર પતિષ્યતિ ॥ ૪૫॥

પુણ્યપાપે સમાયાતો જીવેન સુખદુઃખયોઃ ।
કારણે દેહયોગાદિનાઽઽત્મનઃ કુરુતોઽનિશમ્ ॥૪૬॥

યાવદ્દેહોઽસ્મિ કર્તાસ્મીત્યાત્માહઙ્કુરુતેઽવશઃ ।
અધ્યાસાત્તાવદેવ સ્યાજ્જન્મનાશાદિસમ્ભવઃ ॥ ૪૭॥

તસ્માત્ત્વં ત્યજ દેહાદાવભિમાનં મહામતે ।
આત્માતિનિર્મલઃ શુદ્ધો વિજ્ઞાનાત્માઽચલોઽવ્યયઃ ॥ ૪૮॥

સ્વાજ્ઞાનવશતો બન્ધં પ્રતિપદ્ય વિમુહ્યતિ ।
તસ્માત્ત્વં શુદ્ધભાવેન જ્ઞાત્વાત્માનં સદા સ્મર ॥ ૪૯॥

વિરતિં ભજ સર્વત્ર પુત્રદારગૃહાદિષુ ।
નિરયેષ્વપિ ભોગઃ સ્યાચ્છ્વશૂકરતનાવપિ ॥ ૫૦॥

દેહં લબ્ધ્વા વિવેકાઢ્યં દ્વિજત્વં ચ વિશેષતઃ ।
તત્રાપિ ભારતે વર્ષે કર્મભૂમૌ સુદુર્લભમ્ ॥ ૫૧ ॥

કો વિદ્વાનાત્મસાત્કૃત્વા દેહં ભોગાનુગો ભવેત્ ।
અતસ્ત્વં બ્રાહ્મણો ભૂત્વા પૌલસ્ત્યતનયશ્ચ સન્ ॥ ૫૨॥

અજ્ઞાનીવ સદા ભોગાનનુધાવસિ કિં મુધા ।
ઇતઃ પરં વા ત્યક્ત્વા ત્વં સર્વસઙ્ગં સમાશ્રય ॥ ૫૩॥

રામમેવ પરાત્મનં ભક્તિભાવેન સર્વદા ।
સીતાં સમર્પ્ય રામાય તત્પાદાનુચરો ભવ ॥ ૫૪॥

વિમુક્તઃ સર્વપાપેભ્યો વિષ્ણુલોકં પ્રયાસ્યસિ ।
નો ચેદ્ગમિષ્યસેઽધોઽધઃ પુનરાવૃત્તિવર્જિતઃ ।
અઙ્ગીકુરુષ્વ મદ્વાક્યં હિતમેવ વદામિ તે ॥ ૫૫॥

સત્સઙ્ગતિં કુરુ ભજસ્વ હરિં શરણ્યં
શ્રીરાઘવં મરકતોપલકાન્તિકાન્તમ્ ।
સીતાસમેતમનિશં ધૃતચાપબાણં
સુગ્રીવલક્ષ્મણવિભીષણસેવિતાઙ્ઘ્રિમ્ ॥ ૫૬॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે યુદ્ધકાણ્ડે
ચતુર્થઃ સર્ગઃ ॥ ૪॥

## ॥ પઞ્ચમઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
શ્રુત્વા શુકમુખોદ્ગીતં વાક્યમજ્ઞાનનાશનમ્ ।
રાવણઃ ક્રોધતામ્રાક્ષો દહન્નિવ તમબ્રવીત્ ॥ ૧॥

અનુજીવ્ય સુદુર્બુદ્ધે ગુરુવદ્ભાષસે કથમ્ ।
શાસિતાહં ત્રિજગતાં ત્વં માં શિક્ષન્ન લજ્જસે ॥ ૨॥

ઇદાનીમેવ હન્મિ ત્વાં કિન્તુ પૂર્વકૃતં તવ ।

સ્મરામિ તેન રક્ષામિ ત્વાં યદ્યપિ વધોચિતમ્ ॥ ૩॥

ઇતો ગચ્છ વિમૂઢ ત્વમેવં શ્રોતું ન મે ક્ષમમ્ ।
મહાપ્રસાદ ઇત્યુક્ત્વા વેપમાનો ગૃહં યયૌ ॥ ૪॥

શુકોઽપિ બ્રાહ્મણઃ પૂર્વં બ્રહ્મિષ્ઠો બ્રહ્મવિત્તમઃ ।
વાનપ્રસ્થવિધાનેન વને તિષ્ઠન્ સ્વકર્મકૃત્ ॥ ૫॥

દેવાનામભિવૃદ્ધ્યર્થં વિનાશાય સુરદ્વિષામ્ ।
ચકાર યજ્ઞવિતતિમવિચ્છિન્નાં મહામતિઃ ॥ ૬॥

રાક્ષસાનાં વિરોધોઽભૂચ્છુકો દેવહિતોદ્યતઃ ।
વજ્રદંષ્ટ્ર ઇતિ ખ્યાતસ્તત્રૈકો રાક્ષસો મહાન્ ॥ ૭॥

અન્તરં પ્રેપ્સુરાતિષ્ઠચ્છુકાપકરણોદ્યતઃ ।
કદાચિદાગતોઽગસ્ત્યસ્તસ્યાશ્રમપદં મુનેઃ ॥ ૮॥

તેન સમ્પૂજિતોઽગસ્ત્યો ભોજનાર્થં નિમન્ત્રિતઃ ।
ગતે સ્નાતું મુનૌ કુમ્ભસમ્ભવે પ્રાપ્ય ચાન્તરમ્ ॥ ૯॥

અગસ્ત્યરૂપધૃક્ સોઽપિ રાક્ષસઃ શુકમબ્રવીત્ ।
યદિ દાસ્યસિ મે બ્રહ્મન્ ભોજનં દેહિ સામિષમ્ ॥ ૧૦॥

બહુકાલં ન ભુક્તં મે માંસં છાગાઙ્ગસમ્ભવમ્ ।
તથેતિ કારયામાસ માંસભોજ્યં સવિસ્તરમ્ ॥ ૧૧॥

ઉપવિષ્ટે મુનૌ ભોક્તું રાક્ષસોઽતીવ સુન્દરમ્ ।
શુકભાર્યાવપુર્ધૃત્વા તાં ચાન્તર્મોહયન્ ખલઃ ॥ ૧૨॥

નરમાંસં દદૌ તસ્મૈ સુપક્વં બહુવિસ્તરમ્ ।
દત્ત્વૈવાન્તર્દધે રક્ષસ્તતો દૃષ્ટ્વા ચુકોપ સઃ ॥ ૧૩॥

અમેધ્યં માનુષં માંસમગસ્ત્યઃ શુકમબ્રવીત્ ।
અભક્ષ્યં માનુષં માંસં દત્તવાનસિ દુર્મતે ॥ ૧૪॥

મહ્યં ત્વં રાક્ષસો ભૂત્વા તિષ્ઠ ત્વં માનુષાશનઃ ।
ઇતિ શપ્તઃ શુકો ભીત્યા પ્રાહાગસ્ત્યં મુને ત્વયા ॥ ૧૫॥

ઇદાનીં ભાષિતં મેઽદ્ય માંસં દેહીતિ વિસ્તરમ્ ।
તથૈવ દત્તં ભો દેવ કિં મે શાપં પ્રદાસ્યસિ ॥ ૧૬॥

શ્રુત્વા શુકસ્ય વચનં મુહૂર્તં ધ્યાનમાસ્થિતઃ ।
જ્ઞાત્વા રક્ષઃકૃતં સર્વં તતઃ પ્રાહ શુકં સુધીઃ ॥ ૧૭॥

તવાપકારિણા સર્વં રાક્ષસેન કૃતં ત્વિદમ્ ।
અવિચાર્યૈવ મે દત્તઃ શાપસ્તે મુનિસત્તમ ॥ ૧૮॥

તથાપિ મે વચોઽમોઘમેવમેવ ભવિષ્યતિ ।
રાક્ષસં વપુરાસ્થાય રાવણસ્ય સહાયકૃત્ ॥ ૧૯॥

તિષ્ઠ તાવદ્યદા રામો દશાનનવધાય હિ ।
આગમિષ્યતિ લઙ્કાયાઃ સમીપં વાનરૈઃ સહ ॥ ૨૦॥

પ્રેષિતો રાવણેન ત્વં ચારો ભૂત્વા રઘૂત્તમમ્ ।
દૃષ્ટ્વા શાપાદ્વિનિર્મુક્તો બોધયિત્વા ચ રાવણમ્ ॥ ૨૧॥

તત્ત્વજ્ઞાનં તતો મુક્તઃ પરં પદમવાપ્સ્યસિ ।
ઇત્યુક્તોઽગસ્ત્યમુનિના શુકો બ્રાહ્મણસત્તમઃ ॥ ૨૨॥

બભૂવ રાક્ષસઃ સદ્યો રાવણં પ્રાપ્ય સંસ્થિતઃ ।
ઇદાનીં ચારરૂપેણ દૃષ્ટ્વા રામં સહાનુજમ્ ॥ ૨૩॥

રાવણં તત્ત્વવિજ્ઞાનં બોધયિત્વા પુનર્દ્રુતમ્ ।
પૂર્વવદ્બ્રાહ્મણો ભૂત્વા સ્થિતો વૈખાનસૈઃ સહ ॥ ૨૪॥

તતઃ સમાગમદ્વૃદ્ધો માલ્યવાન્ રાક્ષસો મહાન્ ।
બુદ્ધિમાન્નીતિનિપુણો રાજ્ઞો માતુઃ પ્રિયઃ પિતા ॥ ૨૫॥

પ્રાહ તં રાક્ષસં વીરં પ્રશાન્તેનાન્તરાત્મના ।
શ‍ૃણુ રાજન્ વચો મેઽદ્ય શ્રુત્વા કુરુ યથેપ્સિતમ્ ॥ ૨૬॥

યદા પ્રવિષ્ટા નગરીં જાનકી રામવલ્લભા ।
તદાદિ પુર્યાં દૃશ્યન્તે નિમિત્તાનિ દશાનન ॥ ૨૭॥

ઘોરાણિ નાશહેતૂનિ તાનિ મે વદતઃ શ‍ૃણુ ।
ખરસ્તનિતનિર્ઘોષા મેઘા અતિભયઙ્કરાઃ ॥ ૨૮॥

શોણિતેનાભિવર્ષન્તિ લઙ્કામુષ્ણેન સર્વદા ।
રુદન્તિ દેવલિઙ્ગાનિ સ્વિદ્યન્તિ પ્રચલન્તિ ચ ॥ ૨૯॥

કાલિકા પાણ્ડુરૈર્દન્તૈઃ પ્રહસત્યગ્રતઃ સ્થિતા ।
ખરા ગોષુ પ્રજાયન્તે મૂષકા નકુલૈઃ સહ ॥ ૩૦॥

માર્જારેણ તુ યુદ્ધ્યન્તિ પન્નગા ગરુડેન તુ ।
કરાલો વિકટો મુણ્ડઃ પુરુષઃ કૃષ્ણપિઙ્ગલઃ ॥ ૩૧॥

કાલો ગૃહાણિ સર્વેષાં કાલે કાલે ત્વવેક્ષતે ।
એતાન્યન્યાનિ દૃશ્યન્તે નિમિત્તાન્યુદ્ભવન્તિ ચ ॥ ૩૨॥

અતઃ કુલસ્ય રક્ષાર્થં શાન્તિં કુરુ દશાનન ।
સીતાં સત્કૃત્ય સધનાં રામાયાશુ પ્રયચ્છ ભોઃ ॥ ૩૩॥

રામં નારાયણં વિદ્ધિ વિદ્વેષં ત્યજ રાઘવે ।
યત્પાદપોતમાશ્રિત્ય જ્ઞાનિનો ભવસાગરમ્ ॥ ૩૪॥

તરન્તિ ભક્તિપૂતાન્તાસ્તતો રામો ન માનુષઃ ।
ભજસ્વ ભક્તિભાવેન રામં સર્વહૃદાલયમ્ ॥ ૩૫॥

યદ્યપિ ત્વં દુરાચારો ભક્ત્યા પૂતો ભવિષ્યસિ ।
મદ્વાક્યં કુરુ રાજેન્દ્ર કુલકૌશલહેતવે ॥ ૩૬॥

તત્તુ માલ્યવતો વાક્યં હિતમુક્તં દશાનનઃ ।
ન મર્ષયતિ દુષ્ટાત્મા કાલસ્ય વશમાગતઃ ॥ ૩૭॥

માનવં કૃપણં રામમેકં શાખામૃગાશ્રયમ્ ।
સમર્થં મન્યસે કેન હીનં પિત્રા મુનિપ્રિયમ્ ॥ ૩૮॥

રામેણ પ્રેષિતો નૂનં ભાષસે ત્વમનર્ગલમ્ ।
ગચ્છ વૃદ્ધોઽસિ બન્ધુસ્ત્વં સોઢં સર્વં ત્વયોદિતમ્ ॥ ૩૯॥

ઇતો મત્કર્ણપદવીં દહત્યેતદ્વચસ્તવ ।
ઇત્યુક્ત્વા સર્વસચિવૈઃ સહિતઃ પ્રસ્થિતસ્તદા ॥ ૪૦॥

પ્રાસાદાગ્રે સમાસીનઃ પશ્યન્ વાનરસૈનિકાન્ ।
યુદ્ધાયાયોજયત્સર્વરાક્ષસાન્ સમુપસ્થિતાન્ ॥ ૪૧॥

રામોઽપિ ધનુરાદાય લક્ષ્મણેન સમાહૃતમ્ ।
દૃષ્ટ્વા રાવણમાસીનં કોપેન કલુષીકૃતઃ ॥ ૪૨॥

કિરીટિનં સમાસીનં મન્ત્રિભિઃ પરિવેષ્ટિતમ્ ।
શશાઙ્કાર્ધનિભેનૈવ બાણેનૈકેન રાઘવઃ ॥ ૪૩॥

શ્વેતચ્છત્રસહસ્રાણિ કિરીટદશકં તથા ।

ચિચ્છેદ નિમિષાર્ધેન તદદ્ભુતમિવાભવત્ ॥ ૪૪॥

લજ્જિતો રાવણસ્તૂર્ણં વિવેશ ભવનં સ્વકમ્ ।
આહૂય રાક્ષસાન્ સર્વાન્ પ્રહસ્તપ્રમુખાન્ ખલઃ ॥ ૪૫॥

વાનરૈઃ સહ યુદ્ધાય નોદયામાસ સત્વરઃ ।
તતો ભેરીમૃદઙ્ગાદ્યૈઃ પણવાનકગોમુખૈઃ ॥ ૪૬॥

મહિષોષ્ટ્રૈઃ ખરૈઃ સિંહૈર્દ્વીપિભિઃ કૃતવાહનાઃ ।
ખડ્ગશૂલધનુઃપાશયષ્ટિતોમરશક્તિભિઃ ॥૪૭॥

લક્ષિતાઃ સર્વતો લઙ્કાં પ્રતિદ્વારમુપાયયુઃ ।
તત્પૂર્વમેવ રામેણ નોદિતા વાનરર્ષભાઃ ॥ ૪૮॥

ઉદ્યમ્ય ગિરિશ‍ૃઙ્ગાણિ શિખરાણિ મહાન્તિ ચ ।
તરૂંશ્ચોત્પાટ્ય વિવિધાન્ યુદ્ધાય હરિયૂથપાઃ ॥ ૪૯॥

પ્રેક્ષમાણા રાવણસ્ય તાન્યનીકાનિ ભાગશઃ ।
રાઘવપ્રિયકામાર્થં લઙ્કામારુરુહુસ્તદા ॥ ૫૦॥

તે દ્રુમૈઃ પર્વતાગ્રૈશ્ચ મુષ્ટિભિશ્ચ પ્લવઙ્ગમાઃ ।
તતઃ સહસ્રયૂથાશ્ચ કોટિયૂથાશ્ચ યૂથપાઃ ॥ ૫૧॥

કોટીશતયુતાશ્ચાન્યે રુરુધુર્નગરં ભૃશમ્ ।
આપ્લવન્તઃ પ્લવન્તશ્ચ ગર્જન્તશ્ચ પ્લવઙ્ગમાઃ ॥ ૫૨॥

રામો જયત્યતિબલો લક્ષ્મણશ્ચ મહાબલઃ ।
રાજા જયતિ સુગ્રીવો રાઘવેણાનુપાલિતઃ ॥ ૫૩॥

ઇત્યેવં ઘોષયન્તશ્ચ સમં યુયુધિરેઽરિભિઃ ।
હનૂમાનઙ્ગદશ્ચૈવ કુમુદો નીલ એવ ચ ॥ ૫૪॥

નલશ્ચ શરભશ્ચૈવ મૈન્દો દ્વિવિદ એવ ચ ।
જામ્બવાન્ દધિવક્ત્રશ્ચ કેસરી તાર એવ ચ ॥ ૫૫॥

અન્યે ચ બલિનઃ સર્વે યૂથપાશ્ચ પ્લવઙ્ગમાઃ ।
દ્વારાણ્યુત્પ્લુત્ય લઙ્કાયાઃ સર્વતો રુરુધુર્ભૃશમ્ ।
તદા વૃક્ષૈર્મહાકાયાઃ પર્વતાગ્રૈશ્ચ વાનરાઃ ॥ ૫૬॥

નિજઘ્નુસ્તાનિ રક્ષાંસિ નખૈર્દન્તૈશ્ચ વેગિતાઃ ।
રાક્ષસાશ્ચ તદા ભીમા દ્વારેભ્યઃ સર્વતો રુષા ॥ ૫૭॥

નિર્ગત્ય ભિન્દિપાલૈશ્ચ ખડ્ગૈઃ શૂલૈઃ પરશ્વધૈઃ ।
નિજઘ્નુર્વાનરાનીકં મહાકાયા મહાબલાઃ ॥ ૫૮॥

રાક્ષસાંશ્ચ તથા જઘ્નુર્વાનરા જિતકાશિનઃ ।
તદા બભૂવ સમરો માંસશોણિતકર્દમઃ ॥ ૫૯॥

રક્ષસાં વાનરાણાં ચ સમ્બભૂવાદ્ભુતોપમઃ ।
તે હયૈશ્ચ ગજૈશ્ચૈવ રથૈઃ કાઞ્ચનસન્નિભૈઃ ॥ ૬૦॥

રક્ષોવ્યાઘ્રા યુયુધિરે નાદયન્તો દિશો દશ ।
રાક્ષસાશ્ચ કપીન્દ્રાશ્ચ પરસ્પરજયૈષિણઃ ॥ ૬૧॥

રાક્ષસાન્ વાનરા જઘ્નુર્વાનરાંશ્ચૈવ રાક્ષસાઃ ।
રામેણ વિષ્ણુના દૃષ્ટા હરયો દિવિજાંશજાઃ ॥ ૬૨॥

બભૂવુર્બલિનો હૃષ્ટાસ્તદા પીતામૃતા ઇવ ।
સીતાભિમર્શપાપેન રાવણેનાભિપાલિતાન્ ॥ ૬૩॥

હતશ્રીકાન્ હતબલાન્ રાક્ષસાન્ જઘ્નુરોજસા ।
ચતુર્થાંશાવશેષેણ નિહતં રાક્ષસં બલમ્ ॥ ૬૪॥

સ્વસૈન્યં નિહતં દૃષ્ટ્વા મેઘનાદોઽથ દુષ્ટધીઃ ।
બ્રહ્મદત્તવરઃ શ્રીમાનન્તર્ધાનં ગતોઽસુરઃ ॥ ૬૫॥

સર્વાસ્ત્રકુશલો વ્યોમ્નિ બ્રહ્માસ્ત્રેણ સમન્તતઃ ।
નાનાવિધાનિ શસ્ત્રાણિ વાનરાનીકમર્દયન્ ॥ ૬૬॥

વવર્ષ શરજાલાનિ તદદ્ભુતમિવાભવત્ ।
રામોઽપિ માનયન્ બ્રાહ્મમસ્ત્રમસ્ત્રવિદાં વરઃ ॥ ૬૭॥

ક્ષણં તૂષ્ણીમુવાસાથ દદર્શ પતિતં બલમ્ ।
વાનરાણાં રઘુશ્રેષ્ઠશ્ચુકોપાનલસન્નિભઃ ॥ ૬૮॥

ચાપમાનય સૌમિત્રે બ્રહ્માસ્ત્રેણાસુરં ક્ષણાત્ ।
ભસ્મીકરોમિ મે પશ્ય બલમદ્ય રઘૂત્તમ ॥ ૬૯॥

મેઘનાદોઽપિ તચ્છ્રુત્વા રામવાક્યમતન્દ્રિતઃ ।
તૂર્ણં જગામ નગરં માયયા માયિકોઽસુરઃ ॥ ૭૦॥

પતિતં વાનરાનીકં દૃષ્ટ્વા રામોઽતિદુઃખિતઃ ।

ઉવાચ મારુતિં શીઘ્રં ગત્વા ક્ષીરમહોદધિમ્ ॥ ૭૧॥

તત્ર દ્રોણગિરિર્નામ દિવ્યૌષધિસમુદ્ભવઃ ।
તમાનય દ્રુતં ગત્વા સઞ્જીવય મહામતે ॥ ૭૨॥

વાનરૌઘાન્ મહાસત્ત્વાન્ કીર્તિસ્તે સુસ્થિરા ભવેત્ ।
આજ્ઞાપ્રમાણમિત્યુક્ત્વા જગામાનિલનન્દનઃ ॥ ૭૩॥

આનીય ચ ગિરિં સર્વાન્ વાનરાન્ વાનરર્ષભઃ ।
જીવયિત્વા પુનસ્તત્ર સ્થાપયિત્વાઽઽયયૌ દ્રુતમ્ ॥ ૭૪॥

પૂર્વવદ્ભૈરવં નાદં વાનરાણાં બલૌઘતઃ ।
શ્રુત્વા વિસ્મયમાપન્નો રાવણો વાક્યમબ્રવીત્ ॥ ૭૫॥

રાઘવો મે મહાન્ શત્રુઃ પ્રાપ્તો દેવવિનિર્મિતઃ ।
હન્તું તં સમરે શીઘ્રં ગચ્છન્તુ મમ યૂથપાઃ ॥ ૭૬॥

મન્ત્રિણો બાન્ધવાઃ શૂરા યે ચ મત્પ્રિયકાઙ્ક્ષિણઃ ।
સર્વે ગચ્છન્તુ યુદ્ધાય ત્વરિતં મમ શાસનાત્ ॥ ૭૭॥

યે ન ગચ્છન્તિ યુદ્ધાય ભીરવઃ પ્રાણવિપ્લવાત્ ।
તાન્ હનિષ્યામ્યહં સર્વાન્ મચ્છાસનપરાઙ્મુખાન્ ॥ ૭૮॥

તચ્છ્રુત્વા ભયસન્ત્રસ્તા નિર્જગ્મૂ રણકોવિદાઃ ।
અતિકાયઃ પ્રહસ્તશ્ચ મહાનાદમહોદરૌ ॥ ૭૯॥

દેવશત્રુર્નિકુમ્ભશ્ચ દેવાન્તકનરાન્તકૌ ।
અપરે બલિનઃ સર્વે યયુર્યુદ્ધાય વાનરૈઃ ॥ ૮૦॥

એતે ચાન્યે ચ બહવઃ શૂરાઃ શતસહસ્રશઃ ।
પ્રવિશ્ય વાનરં સૈન્યં મમન્થુર્બલદર્પિતાઃ ॥ ૮૧॥

ભુશુણ્ડીભિન્દિપાલૈશ્ચ બાણૈઃ ખડ્ગૈઃ પરશ્વધૈઃ ।
અન્યૈશ્ચ વિવિધૈરસ્ત્રૈર્નિજઘ્નુર્હરિયૂથપાન્ ॥ ૮૨॥

તે પાદપૈઃ પર્વતાગ્રૈર્નખદંષ્ટ્રૈશ્ચ મુષ્ટિભિઃ ।
પ્રાણૈર્વિમોચયામાસુઃ સર્વરાક્ષસયૂથપાન્ ॥ ૮૩॥

રામેણ નિહતાઃ કેચિત્સુગ્રીવેણ તથાપરે ।
હનૂમતા ચાઙ્ગદેન લક્ષ્મણેન મહાત્મના ।
યૂથપૈર્વાનરાણાં તે નિહતાઃ સર્વરાક્ષસાઃ ॥ ૮૪॥

રામતેજઃ સમાવિશ્ય વાનરા બલિનોઽભવન્ ।
રામશક્તિવિહીનાનામેવં શક્તિઃ કુતો ભવેત્ ॥ ૮૫॥

સર્વેશ્વરઃ સર્વમયો વિધાતા
　　માયામનુષ્યત્વવિડમ્બનેન ।
સદા ચિદાનન્દમયોઽપિ રામો
　　યુદ્ધાદિલીલાં વિતનોતિ માયામ્ ॥ ૮૬॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે યુદ્ધકાણ્ડે
પઞ્ચમઃ સર્ગઃ ॥ ૫॥

## ॥ષષ્ઠઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
શ્રુત્વા યુદ્ધે બલં નષ્ટમતિકાયમુખં મહત્ ।
રાવણો દુઃખસન્તપ્તઃ ક્રોધેન મહતાઽઽવૃતઃ ॥ ૧॥

નિધાયેન્દ્રજિતં લઙ્કારક્ષણાર્થં મહાદ્યુતિઃ ।
સ્વયં જગામ યુદ્ધાય રામેણ સહ રાક્ષસઃ ॥ ૨॥

દિવ્યં સ્યન્દનમારુહ્ય સર્વશસ્ત્રાસ્ત્રસંયુતમ્ ।
રામમેવાભિદુદ્રાવ રાક્ષસેન્દ્રો મહાબલઃ ॥ ૩॥

વાનરાન્ બહુશો હત્વા બાણૈરાશીવિષોપમૈઃ ।
પાતયામાસ સુગ્રીવપ્રમુખાન્ યૂથનાયકાન્ ॥ ૪॥

ગદાપાણિં મહાસત્ત્વં તત્ર દૃષ્ટ્વા વિભીષણમ્ ।
ઉત્સસર્જ મહાશક્તિં મયદત્તાં વિભીષણે ॥ ૫॥

તામાપતન્તીમાલોક્ય વિભીષણવિઘાતિનીમ્ ।
દત્તાભયોઽયં રામેણ વધાર્હો નાયમાસુરઃ ॥ ૬॥

ઇત્યુક્ત્વા લક્ષ્મણો ભીમં ચાપમાદાય વીર્યવાન્ ।
વિભીષણસ્ય પુરતઃ સ્થિતોઽકમ્પ ઇવાચલઃ ॥ ૭॥

સા શક્તિર્લક્ષ્મણતનું વિવેશામોઘશક્તિતઃ ।

યાવન્ત્યઃ શક્તયો લોકે માયાયાઃ સમ્ભવન્તિ હિ ॥ ૮॥

તાસામાધારભૂતસ્ય લક્ષ્મણસ્ય મહાત્મનઃ ।
માયાશક્ત્યા ભવેત્કિં વા શેષાંશસ્ય હરેસ્તનોઃ ॥ ૯॥

તથાપિ માનુષં ભાવમાપન્નસ્તદનુવ્રતઃ ।
મૂર્ચ્છિતઃ પતિતો ભૂમૌ તમાદાતું દશાનનઃ ॥ ૧૦॥

હસ્તૈસ્તોલયિતું શક્તો ન બભૂવાતિવિસ્મિતઃ ।
સર્વસ્ય જગતઃ સારં વિરાજં પરમેશ્વરમ્ ॥ ૧૧॥

કથં લોકાશ્રયં વિષ્ણું તોલયેલ્લઘુરાક્ષસઃ ।
ગ્રહીતુકામં સૌમિત્રિં રાવણં વીક્ષ્ય મારુતિઃ ॥ ૧૨॥

આજઘાનોરસિ ક્રુધ્દો વજ્રકલ્પેન મુષ્ટિના ।
તેન મુષ્ટિપ્રહારેણ જાનુભ્યામપતદ્ભુવિ ॥ ૧૩॥

આસ્યૈશ્ચ નેત્રશ્રવણૈરુદ્વમન્ રુધિરં બહુ ।
વિઘૂર્ણમાનનયનો રથોપસ્થ ઉપાવિશત્ ॥ ૧૪॥

અથ લક્ષ્મણમાદાય હનૂમાન્ રાવણાર્દિતમ્ ।
આનયદ્રામસામીપ્યં બાહુભ્યાં પરિગૃહ્ય તમ્ ॥ ૧૫॥

હનૂમતઃ સુહૃત્ત્વેન ભક્ત્યા ચ પરમેશ્વરઃ ।
લઘુત્વમગમદ્દેવો ગુરૂણાં ગુરુરપ્યજઃ ॥ ૧૬॥

સા શક્તિરપિ તં ત્યક્ત્વા જ્ઞાત્વા નારાયણાંશજમ્ ।
રાવણસ્ય રથં પ્રાગાદ્રાવણોઽપિ શનૈસ્તતઃ ॥ ૧૭॥

સઞ્જ્ઞામવાપ્ય જગ્રાહ બાણાસનમથો રુષા ।
રામમેવાભિદુદ્રાવ દૃષ્ટ્વા રામોઽપિ તં ક્રુધા ॥ ૧૮॥

આરુહ્ય જગતાં નાથો હનૂમન્તં મહાબલમ્ ।
રથસ્થં રાવણં દૃષ્ટ્વા અભિદુદ્રાવ રાઘવઃ ॥ ૧૯॥

જ્યાશબ્દમકરોત્તીવ્રં વજ્રનિષ્પેષનિષ્ઠુરમ્ ।
રામો ગમ્ભીરયા વાચા રાક્ષસેન્દ્રમુવાચ હ ॥ ૨૦॥

રાક્ષસાધમ તિષ્ઠાદ્ય ક્વ ગમિષ્યસિ મે પુરઃ ।
કૃત્વાપરાધમેવં મે સર્વત્ર સમદર્શિનઃ ॥ ૨૧॥

યેન બાણેન નિહતા રાક્ષસાસ્તે જનાલયે ।
તેનૈવ ત્વાં હનિષ્યામિ તિષ્ઠાદ્ય મમ ગોચરે ॥ ૨૨॥

શ્રીરામસ્ય વચઃ શ્રુત્વા રાવણો મારુતાત્મજમ્ ।
વહન્તં રાઘવં સઙ્ખ્યે શરૈસ્તીક્ષ્ણૈરતાડયત્ ॥ ૨૩॥

હતસ્યાપિ શરૈસ્તીક્ષ્ણૈર્વાયુસૂનોઃ સ્વતેજસા ।
વ્યવર્ધત પુનસ્તેજો નનર્દ ચ મહાકપિઃ ॥ ૨૪॥

તતો દૃષ્ટ્વા હનૂમન્તં સવ્રણં રઘુસત્તમઃ ।
ક્રોધમાહારયામાસ કાલરુદ્ર ઇવાપરઃ ॥ ૨૫॥

સાશ્વં રથં ધ્વજં સૂતં શસ્ત્રૌઘં ધનુરઞ્જસા ।
છત્રં પતાકાં તરસા ચિચ્છેદ શિતસાયકૈઃ ॥ ૨૬॥

તતો મહાશરેણાશુ રાવણં રઘુસત્તમઃ ।
વિવ્યાધ વજ્રકલ્પેન પાકારિરિવ પર્વતમ્ ॥ ૨૭॥

રામબાણહતો વીરશ્ચચાલ ચ મુમોહ ચ ।
હસ્તાન્નિપતિતશ્ચાપસ્તં સમીક્ષ્ય રઘૂત્તમઃ ॥ ૨૮॥

અર્ધચન્દ્રેણ ચિચ્છેદ તત્કિરીટં રવિપ્રભમ્ ।
અનુજાનામિ ગચ્છ ત્વમિદાનીં બાણપીડિતઃ ॥ ૨૯॥

પ્રવિશ્ય લઙ્કામાશ્વાસ્ય શ્વઃ પશ્યસિ બલં મમ ।
રામબાણેન સંવિદ્ધો હતદર્પોઽથ રાવણઃ ॥ ૩૦॥

મહત્યા લજ્જયા યુક્તો લઙ્કાં પ્રાવિશદાતુરઃ ।
રામોઽપિ લક્ષ્મણં દૃષ્ટ્વા મૂર્ચ્છિતં પતિતં ભુવિ ॥ ૩૧॥

માનુષત્વમુપાશ્રિત્ય લીલયાનુશુશોચ હ ।
તતઃ પ્રાહ હનૂમન્તં વત્સ જીવય લક્ષ્મણમ્ ॥ ૩૨॥

મહૌષધીઃ સમાનીય પૂર્વવદ્વાનરાનપિ ।
તથેતિ રઘવેણોક્તો જગામાશુ મહાકપિઃ ॥ ૩૩॥

હનૂમાન્ વાયુવેગેન ક્ષણાત્તીર્ત્વા મહોદધિમ્ ।
એતસ્મિન્નન્તરે ચારા રાવણાય ન્યવેદયન્ ॥ ૩૪॥

રામેણ પ્રેષિતો દેવ હનૂમાન્ ક્ષીરસાગરમ્ ।
ગતો નેતું લક્ષ્મણસ્ય જીવનાર્થં મહૌષધીઃ ॥ ૩૫॥

શ્રુત્વા તચ્ચારવચનં રાજા ચિન્તાપરોઽભવત્ ।
જગામ રાત્રાવેકાકી કાલનેમિગૃહં ક્ષણાત્ ॥ ૩૬॥

ગૃહાગતં સમાલોક્ય રાવણં વિસ્મયાન્વિતઃ ।
કાલનેમિરુવાચેદં પ્રાઞ્જલિર્ભયવિહ્વલઃ ।
અર્ઘ્યાદિકં તતઃ કૃત્વા રાવણસ્યાગ્રતઃ સ્થિતઃ ॥ ૩૭॥

કિં તે કરોમિ રાજેન્દ્ર કિમાગમનકારણમ્ ।
કાલનેમિમુવાચેદં રાવણો દુઃખપીડિતઃ ॥ ૩૮॥

મમાપિ કાલવશતઃ કષ્ટમેતદુપસ્થિતમ્ ।
મયા શક્ત્યા હતો વીરો લક્ષ્મણઃ પતિતો ભુવિ ॥ ૩૯॥

તં જીવયિતુમાનેતુમોષધીર્હનુમાન્ ગતઃ ।
યથા તસ્ય ભવેદ્વિઘ્નસ્તથા કુરુ મહામતે ॥ ૪૦॥

માયયા મુનિવેષેણ મોહયસ્વ મહાકપિમ્ ।
કાલાત્યયો યથા ભૂયાત્તથા કૃત્વૈહિ મન્દિરે ॥ ૪૧॥

રાવણસ્ય વચઃ શ્રુત્વા કાલનેમિરુવાચ તમ્ ।
રાવણેશ વચો મેઽદ્ય શ◌ૃણુ ધારય તત્ત્વતઃ ॥ ૪૨॥

પ્રિયં તે કરવાણ્યેવ ન પ્રાણાન્ ધારયામ્યહમ્ ।
મારીચસ્ય યથારણ્યે પુરાભૂન્મૃગરૂપિણઃ ॥ ૪૩॥

તથૈવ મે ન સન્દેહો ભવિષ્યતિ દશાનન ।
હતાઃ પુત્રાશ્ચ પૌત્રાશ્ચ બાન્ધવા રાક્ષસાશ્ચ તે ॥ ૪૪॥

ઘાતયિત્વાઽસુરકુલં જીવિતેનાપિ કિં તવ ।
રાજ્યેન વા સીતયા વા કિં દેહેન જડાત્મના ॥ ૪૫॥

સીતાં પ્રયચ્છ રામાય રાજ્યં દેહિ વિભીષણે ।
વનં યાહિ મહાબાહો રમ્યં મુનિગણાશ્રયમ્ ॥ ૪૬॥

સ્નાત્વા પ્રાતઃ શુભજલે કૃત્વા સન્ધ્યાદિકાઃ ક્રિયાઃ ।
તત એકાન્તમાશ્રિત્ય સુખાસનપરિગ્રહઃ ॥ ૪૭॥

વિસૃજ્ય સર્વતઃ સઙ્ગમિતરાન્ વિષયાન્ બહિઃ ।
બહિઃપ્રવૃત્તાક્ષગણં શનૈઃ પ્રત્યક્ પ્રવાહય ॥ ૪૮॥

પ્રકૃતેર્ભિન્નમાત્માનં વિચારય સદાનઘ ।
ચરાચરં જગત્કૃત્સ્નં દેહબુદ્ધીન્દ્રિયાદિકમ્ ॥ ૪૯॥

આબ્રહ્મસ્તમ્બપર્યન્તં દૃશ્યતે શ્રૂયતે ચ યત્ ।
સૈષા પ્રકૃતિરિત્યુક્તા સૈવ માયેતિ કીર્તિતા ॥ ૫૦॥

સર્ગસ્થિતિવિનાશાનાં જગદ્વૃક્ષસ્ય કારણમ્ ।
લોહિતશ્વેતકૃષ્ણાદિ પ્રજાઃ સૃજતિ સર્વદા ॥ ૫૧॥

કામક્રોધાદિપુત્રાદ્યાન્ હિંસાતૃષ્ણાદિકન્યકાઃ ।
મોહયન્ત્યનિશં દેવમાત્માનં સ્વૈર્ગુણૈર્વિભુમ્ ॥ ૫૨॥

કર્તૃત્વભોક્તૃત્વમુખાન્ સ્વગુણાનાત્મનીશ્વરે ।
આરોપ્ય સ્વવશં કૃત્વા તેન ક્રીડતિ સર્વદા ॥ ૫૩॥

શુદ્ધોઽપ્યાત્મા યયા યુક્તઃ પશ્યતીવ સદા બહિઃ ।
વિસ્મૃત્ય ચ સ્વમાત્માનં માયાગુણવિમોહિતઃ ॥ ૫૪॥

યદા સદ્ગુરુણા યુક્તો બોધ્યતે બોધરૂપિણા ।
નિવૃત્તદૃષ્ટિરાત્માનં પશ્યત્યેવ સદા સ્ફુટમ્ ॥ ૫૫॥

જીવન્મુક્તઃ સદા દેહી મુચ્યતે પ્રાકૃતૈર્ગુણૈઃ ।
ત્વમપ્યેવં સદાત્માનં વિચાર્ય નિયતેન્દ્રિયઃ ॥ ૫૬॥

પ્રકૃતેરન્યમાત્માનં જ્ઞાત્વા મુક્તો ભવિષ્યસિ ।
ધ્યાતું યદ્યસમર્થોઽસિ સગુણં દેવમાશ્રય ॥ ૫૭॥

હૃત્પદ્મકર્ણિકે સ્વર્ણપીઠે મણિગણાન્વિતે ।
મૃદુશ્લક્ષ્ણતરે તત્ર જાનક્યા સહ સંસ્થિતમ્ ॥ ૫૮॥

વીરાસનં વિશાલાક્ષં વિદ્યુત્પુઞ્જનિભામ્બરમ્ ।
કિરીટહારકેયૂરકૌસ્તુભાદિભિરન્વિતમ્ ॥ ૫૯॥

નૂપુરૈઃ કટકૈર્ભાન્તં તથૈવ વનમાલયા ।
લક્ષ્મણેન ધનુર્દ્વન્દ્વકરેણ પરિસેવિતમ્ ॥ ૬૦॥

એવં ધ્યાત્વા સદાત્માનં રામં સર્વહૃદિ સ્થિતમ્ ।
ભક્ત્યા પરમયા યુક્તો મુચ્યતે નાત્ર સંશયઃ ॥ ૬૧॥

શ્ૃણુ વૈ ચરિતં તસ્ય ભક્તૈર્નિત્યમનન્યધીઃ ।
એવં ચેત્કૃતપૂર્વાણિ પાપાનિ ચ મહાન્ત્યપિ ।

ક્ષણાદેવ વિનશ્યન્તિ યથાગ્નેસ્તૂલરાશયઃ ॥ ૬૨॥

ભજસ્વ રામં પરિપૂર્ણમેકં
    વિહાય વૈરં નિજભક્તિયુક્તઃ ।
હૃદા સદા ભાવિતભાવરૂપં
    અનામરૂપં પુરુષં પુરાણમ્ ॥ ૬૩॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે યુદ્ધકાણ્ડે ષષ્ઠઃ
સર્ગઃ ॥ ૬॥

## ॥ સપ્તમઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
કાલનેમિવચઃ શ્રુત્વા રાવણોઽમૃતસન્નિભમ્ ।
જજ્વાલ ક્રોધતામ્રાક્ષઃ સર્પિરદ્ભિરિવાગ્નિમત્ ॥ ૧॥

નિહન્મિ ત્વાં દુરાત્માનં મચ્છાસનપરાઙ્મુખમ્ ।
પરૈઃ કિઞ્ચિદ્ગૃહીત્વા ત્વં ભાષસે રામકિઙ્કરઃ ॥ ૨॥

કાલનેમિરુવાચેદં રાવણં દેવ કિં ક્રુધા ।
ન રોચતે મે વચનં યદિ ગત્વા કરોમિ તત્ ॥ ૩॥

ઇત્યુક્ત્વા પ્રયયૌ શીઘ્રં કાલનેમિર્મહાસુરઃ ।
નોદિતો રાવણેનૈવ હનૂમદ્વિઘ્નકારણાત્ ॥ ૪॥

સ ગત્વા હિમવત્પાર્શ્વં તપોવનમકલ્પયત્ ।
તત્ર શિષ્યૈઃ પરિવૃતો મુનિવેષધરઃ ખલઃ ॥ ૫॥

ગચ્છતો માર્ગમાસાદ્ય વાયુસૂનોર્મહાત્મનઃ ।
તતો ગત્વા દદર્શાથ હનૂમાનાશ્રમં શુભમ્ ॥ ૬॥

ચિન્તયામાસ મનસા શ્રીમાન્ પવનનન્દનઃ ।
પુરા ન દૃષ્ટમેતન્મે મુનિમણ્ડલમુત્તમમ્ ॥ ૭॥

માર્ગો વિભ્રંશિતો વા મે ભ્રમો વા ચિત્તસમ્ભવઃ ।
યદ્વાઽઽવિશ્યાશ્રમપદં દૃષ્ટ્વા મુનિમશેષતઃ ॥ ૮॥

પીત્વા જલં તતો યામિ દ્રોણાચલમનુત્તમમ્ ।

ઇત્યુક્ત્વા પ્રવિવેશાથ સર્વતો યોજનાયતમ્ ॥ ૯॥

આશ્રમં કદલીશાલખર્જૂરપનસાદિભિઃ ।
સમાવૃતં પક્વફલૈર્નમ્રશાખૈશ્ચ પાદપૈઃ ॥ ૧૦॥

વૈરભાવવિનિર્મુક્તં શુદ્ધં નિર્મલલક્ષણમ્ ।
તસ્મિન્મહાશ્રમે રમ્યે કાલનેમિઃ સ રાક્ષસઃ ॥ ૧૧॥

ઇન્દ્રયોગં સમાસ્થાય ચકાર શિવપૂજનમ્ ।
હનૂમાનભિવાદ્યાહ ગૌરવેણ મહાસુરમ્ ॥ ૧૨॥

ભગવન્ રામદૂતોઽહં હનૂમાન્નામ નામતઃ ।
રામકાર્યેણ મહતા ક્ષીરાબ્ધિં ગન્તુમુદ્યતઃ ॥ ૧૩॥

તૃષા માં બાધતે બ્રહ્મન્નુદકં કુત્ર વિદ્યતે ।
યથેચ્છં પાતુમિચ્છામિ કથ્યતાં મે મુનીશ્વર ॥ ૧૪॥

તચ્છ્રુત્વા મારુતેર્વાક્યં કાલનેમિસ્તમબ્રવીત્ ।
કમણ્ડલુગતં તોયં મમ ત્વં પાતુમર્હસિ ॥ ૧૫॥

ભુઙ્ક્ષ્વ ચેમાનિ પક્વાનિ ફલાનિ તદનન્તરમ્ ।
નિવસસ્વ સુખેનાત્ર નિદ્રામેહિ ત્વરાસ્તુ મા ॥ ૧૬॥

ભૂતં ભવ્યં ભવિષ્યં ચ જાનામિ તપસા સ્વયમ્ ।
ઉત્થિતો લક્ષ્મણઃ સર્વે વાનરા રામવીક્ષિતાઃ ॥ ૧૭॥

તચ્છ્રુત્વા હનુમાનાહ કમણ્ડલુજલેન મે ।
ન શામ્યત્યધિકા તૃષ્ણા તતો દર્શય મે જલમ્ ॥ ૧૮॥

તથેત્યાજ્ઞાપયામાસ વટું માયાવિકલ્પિતમ્ ।
વટો દર્શય વિસ્તીર્ણં વાયુસૂનોર્જલાશયમ્ ॥ ૧૯॥

નિમીલ્ય ચાક્ષિણી તોયં પીત્વાગચ્છ મમાન્તિકમ્ ।
ઉપદેક્ષ્યામિ તે મન્ત્રં યેન દ્રક્ષ્યસિ ચૌષધીઃ ॥ ૨૦॥

તથેતિ દર્શિતં શીઘ્રં વટુના સલિલાશયમ્ ।
પ્રવિશ્ય હનુમાંસ્તોયમપિબન્મીલિતેક્ષણઃ ॥ ૨૧॥

તતશ્ચાગત્ય મકરી મહામાયા મહાકપિમ્ ।
અગ્રસત્તં મહાવેગાન્મારુતિં ઘોરરૂપિણી ॥ ૨૨॥

તતો દદર્શ હનુમાન્ ગ્રસન્તીં મકરીં રુષા ।
દારયામાસ હસ્તાભ્યાં વદનં સા મમાર હ ॥ ૨૩॥

તતોઽન્તરિક્ષે દદૃશે દિવ્યરૂપધરાઙ્ગના ।
ધાન્યમાલીતિ વિખ્યાતા હનૂમન્તમથાબ્રવીત્ ॥ ૨૪॥

ત્વત્પ્રસાદાદહં શાપાદ્વિમુક્તાસ્મિ કપીશ્વર ।
શપ્તાહં મુનિના પૂર્વમપ્સરા કારણાન્તરે ॥ ૨૫॥

આશ્રમે યસ્તુ તે દૃષ્ટઃ કાલનેમિર્મહાસુરઃ ।
રાવણપ્રહિતો માર્ગે વિઘ્નં કર્તું તવાનઘ ॥ ૨૬॥

મુનિવેષધરો નાસૌ  મુનિર્વિપ્રવિહિંસકઃ ।
જહિ દુષ્ટં ગચ્છ શીઘ્રં દ્રોણાચલમનુત્તમમ્ ॥ ૨૭॥

ગચ્છામ્યહં બ્રહ્મલોકં ત્વત્સ્પર્શાદ્ધુતકલ્મષા ।
ઇત્યુક્ત્વા સા યયૌ સ્વર્ગં હનૂમાનપ્યથાશ્રમમ્ ॥ ૨૮॥

આગતં તં સમાલોક્ય કાલનેમિરભાષત ।
કિં વિલમ્બેન મહતા તવ વાનરસત્તમ ॥ ૨૯॥

ગૃહાણ મત્તો મન્ત્રાંસ્ત્વં દેહિ મે ગુરુદક્ષિણામ્ ।
ઇત્યુક્તો હનુમાન્મુષ્ટિં દૃઢં બદ્ધ્વાહ રાક્ષસમ્ ॥ ૩૦॥

ગૃહાણ દક્ષિણામેતામિત્યુક્ત્વા નિજઘાન તમ્ ।
વિસૃજ્ય મુનિવેષં સ કાલનેમિર્મહાસુરઃ ॥ ૩૧॥

યુયુધે વાયુપુત્રેણ નાનામાયાવિધાનતઃ ।
મહામાયિકદૂતોઽસૌ હનૂમાન્માયિનાં રિપુઃ ॥ ૩૨॥

જઘાન મુષ્ટિના શીર્ષ્ણિ ભગ્નમૂર્ધા મમાર સઃ ।
તતઃ ક્ષીરનિધિં ગત્વા દૃષ્ટ્વા દ્રોણં મહાગિરિમ્ ॥ ૩૩॥

અદૃષ્ટ્વા ચૌષધીસ્તત્ર ગિરિમુત્પાટ્ય સત્વરઃ ।
ગૃહીત્વા વાયુવેગેન ગત્વા રામસ્ય સન્નિધિમ્ ॥ ૩૪॥

ઉવાચ હનુમાન્ રામમાનીતોઽયં મહાગિરિઃ ।
યદ્યુક્તં કુરુ દેવેશ વિલમ્બો નાત્ર યુજ્યતે ॥ ૩૫॥

શ્રુત્વા હનૂમતો વાક્યં રામઃ સન્તુષ્ટમાનસઃ ।
ગૃહીત્વા ચૌષધીઃ શીઘ્રં સુષેણેન મહામતિઃ ॥ ૩૬॥

ચિકિત્સાં કારયામાસ લક્ષ્મણાય મહાત્મને ।
તતઃ સુપ્તોત્થિત ઇવ બુદ્ધ્વા પ્રોવાચ લક્ષ્મણઃ ॥ ૩૭॥

તિષ્ઠ તિષ્ઠ ક્વ ગન્તાસિ હન્મીદાનીં દશાનન ।
ઇતિ બ્રુવન્તમાલોક્ય મૂર્ધ્ન્યવઘ્રાય રાઘવઃ ॥ ૩૮॥

મારુતિં પ્રાહ વત્સાદ્ય ત્વત્પ્રસાદાન્મહાકપે ।
નિરામયં પ્રપશ્યામિ લક્ષ્મણં ભ્રાતરં મમ ॥ ૩૯॥

ઇત્યુક્ત્વા વાનરૈઃ સાર્ધં સુગ્રીવેણ સમન્વિતઃ ।
વિભીષણમતેનૈવ યુદ્ધાય સમવસ્થિતઃ ॥ ૪૦॥

પાષાણૈઃ પાદપૈશ્ચૈવ પર્વતાગ્રૈશ્ચ વાનરાઃ ।
યુદ્ધાયાભિમુખા ભૂત્વા યયુઃ સર્વે યુયુત્સવઃ ॥ ૪૧॥

રાવણો વિવ્યથે રામબાણૈર્વિદ્ધો મહાસુરઃ ।
માતઙ્ગ ઇવ સિંહેન ગરુડેનેવ પન્નગઃ ॥ ૪૨॥

અભિભૂતોऽગમદ્રાજા રાઘવેણ મહાત્મના ।
સિંહાસને સમાવિશ્ય રાક્ષસાનિદમબ્રવીત્ ॥ ૪૩॥

માનુષેણૈવ મે મૃત્યુમાહ પૂર્વં પિતામહઃ ।
માનુષો હિ ન માં હન્તું શક્તોऽસ્તિ ભુવિ કશ્ચન ॥ ૪૪॥

તતો નારાયણઃ સાક્ષાન્માનુષોऽભૂન્ન સંશયઃ ।
રામો દાશરથિર્ભૂત્વા માં હન્તું સમુપસ્થિતઃ ॥ ૪૫॥

અનરણ્યેન યત્પૂર્વં શપ્તોऽહં રાક્ષસેશ્વર ।
ઉત્પત્સ્યતે ચ મદ્વંશે પરમાત્મા સનાતનઃ ॥ ૪૬॥

તેન ત્વં પુત્રપૌત્રૈશ્ચ  બાન્ધવૈશ્ચ સમન્વિતઃ ।
હનિષ્યસે ન સન્દેહ ઇત્યુક્ત્વા માં દિવં ગતઃ ॥ ૪૭॥

સ એવ રામઃ સઞ્જાતો મદર્થે માં હનિષ્યતિ ।
કુમ્ભકર્ણસ્તુ મૂઢાત્મા સદા નિદ્રાવશં ગતઃ ॥ ૪૮॥

તં વિબોધ્ય મહાસત્ત્વમાનયન્તુ મમાન્તિકમ્ ।
ઇત્યુક્તાસ્તે મહાકાયાસ્તૂર્ણં ગત્વા તુ યત્નતઃ ॥ ૪૯॥

વિબોધ્ય કુમ્ભશ્રવણં નિન્યૂ રાવણસન્નિધિમ્ ।

નમસ્કૃત્ય સ રાજાનમાસનોપરિ સંસ્થિતઃ ॥ ૫૦॥

તમાહ રાવણો રાજા ભ્રાતરં દીનયા ગિરા ।
કુમ્ભકર્ણ નિબોધ ત્વં મહત્કષ્ટમુપસ્થિતમ્ ॥ ૫૧॥

રામેણ નિહતાઃ શૂરાઃ પુત્રાઃ પૌત્રાશ્ચ બાન્ધવાઃ ।
કિં કર્તવ્યમિદાનીં મે મૃત્યુકાલ ઉપસ્થિતે ॥ ૫૨॥

એષ દાશરથી રામઃ સુગ્રીવસહિતો બલી ।
સમુદ્રં સબલસ્તીર્ત્વા મૂલં નઃ પરિકૃન્તતિ ॥ ૫૩॥

યે રાક્ષસા મુખ્યતમાસ્તે હતા વાનરૈર્યુધિ ।
વાનરાણાં ક્ષયં યુદ્ધે ન પશ્યામિ કદાચન ॥ ૫૪॥

નાશયસ્વ મહાબાહો યદર્થં પરિબોધિતઃ ।
ભ્રાતુરર્થે મહાસત્ત્વ કુરુ કર્મ સુદુષ્કરમ્ ॥ ૫૫॥

શ્રુત્વા તદ્રાવણેન્દ્રસ્ય વચનં પરિદેવિતમ્ ।
કુમ્ભકર્ણો જહાસોચ્ચૈર્વચનં ચેદમબ્રવીત્ ॥ ૫૬॥

પુરા મન્ત્રવિચારે તે ગદિતં યન્મયા નૃપ ।
તદદ્ય ત્વામુપગતં ફલં પાપસ્ય કર્મણઃ ॥ ૫૭॥

પૂર્વમેવ મયા પ્રોક્તો રામો નારાયણઃ પરઃ ।
સીતા ચ યોગમાયેતિ બોધિતોઽપિ ન બુધ્યસે ॥ ૫૮॥

એકદાહં વને સાનૌ વિશાલાયાં સ્થિતો નિશિ ।
દૃષ્ટો મયા મુનિઃ સાક્ષાન્નારદો દિવ્યદર્શનઃ ॥ ૫૯॥

તમબ્રવં મહાભાગ કુતો ગન્તાસિ મે વદ ।
ઇત્યુક્તો નારદઃ પ્રાહ દેવાનાં મન્ત્રણે સ્થિતઃ ॥ ૬૦॥

તત્રોત્પન્નમુદન્તં તે વક્ષ્યામિ શ઼ૃણુ તત્ત્વતઃ ।
યુવાભ્યાં પીડિતા દેવાઃ સર્વે વિષ્ણુમુપાગતાઃ ॥ ૬૧॥

ઊચુસ્તે દેવદેવેશં સ્તુત્વા ભક્ત્યા સમાહિતાઃ ।
જહિ રાવણમક્ષોભ્યં દેવ ત્રૈલોક્યકણ્ટકમ્ ॥ ૬૨॥

માનુષેણ મૃતિસ્તસ્ય કલ્પિતા બ્રહ્મણા પુરા ।
અતસ્ત્વં માનુષો ભૂત્વા જહિ રાવણકણ્ટકમ્ ॥ ૬૩॥

તથેત્યાહ મહાવિષ્ણુઃ સત્યસઙ્કલ્પ ઈશ્વરઃ ।
જાતો રઘુકુલે દેવો રામ ઇત્યભિવિશ્રુતઃ ॥ ૬૪॥

સ હનિષ્યતિ વઃ સર્વાનિત્યુક્ત્વા પ્રયયૌ મુનિઃ ।
અતો જાનીહિ રામં ત્વં પરં બ્રહ્મ સનાતનમ્ ॥ ૬૫॥

ત્યજ વૈરં ભજસ્વાદ્ય માયામાનુષવિગ્રહમ્ ।
ભજતો ભક્તિભાવેન પ્રસીદતિ રઘૂત્તમઃ ॥ ૬૬॥

ભક્તિર્જનિત્રી જ્ઞાનસ્ય ભક્તિર્મોક્ષપ્રદાયિની ।
ભક્તિહીનેન યત્કિઞ્ચિત્કૃતં સર્વમસત્સમમ્ ॥ ૬૭॥

અવતારાઃ સુબહવો વિષ્ણોર્લીલાનુકારિણઃ ।
તેષાં સહસ્રસદૃશો રામો જ્ઞાનમયઃ શિવઃ ॥ ૬૮॥

રામં ભજન્તિ નિપુણા મનસા વચસાઽનિશમ્ ।
અનાયાસેન સંસારં તીર્ત્વા યાન્તિ હરેઃ પદમ્ ॥ ૬૯॥

યે રામમેવ સતતં ભુવિ શુદ્ધસત્ત્વા
ધ્યાયન્તિ તસ્ય ચરિતાનિ પઠન્તિ સન્તઃ ।
મુક્તાસ્ત એવ ભવભોગમહાહિપાશૈઃ
સીતાપતેઃ પદમનન્તસુખં પ્રયાન્તિ ॥ ૭૦॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે યુદ્ધકાણ્ડે સપ્તમઃ સર્ગઃ ॥ ૭॥

## ॥ અષ્ટમઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
કુમ્ભકર્ણવચઃ શ્રુત્વા ભ્રુકુટીવિકટાનનઃ ।
દશગ્રીવો જગાદેદમાસનાદુત્પતન્નિવ ॥ ૧॥

ત્વમાનીતો ન મે જ્ઞાનબોધનાય સુબુદ્ધિમાન્ ।
મયા કૃતં સમીકૃત્ય યુધ્યસ્વ યદિ રોચતે ॥ ૨॥

નો ચેદ્ગચ્છ સુષુપ્ત્યર્થં નિદ્રા ત્વાં બાધતેઽધુના ।
રાવણસ્ય વચઃ શ્રુત્વા કુમ્ભકર્ણો મહાબલઃ ॥ ૩॥

રુષ્ટોઽયમિતિ વિજ્ઞાય તૂર્ણં યુદ્ધાય નિર્યયૌ ।
સ લઙ્ઘયિત્વા પ્રાકારં મહાપર્વતસન્નિભઃ ॥ ૪॥

નિર્યયૌ નગરાત્તૂર્ણં ભીષયન્ હરિસૈનિકાન્ ।
સ નનાદ મહાનાદં સમુદ્રમભિનાદયન્ ॥ ૫॥

વાનરાન્ કાલયામાસ બાહુભ્યાં ભક્ષયન્ રુષા ।
કુમ્ભકર્ણં તદા દૃષ્ટ્વા સપક્ષમિવ પર્વતમ્ ॥ ૬॥

દુદ્રુવુર્વાનરાઃ સર્વે કાલાન્તકમિવાખિલાઃ ।
ભ્રમન્તં હરિવાહિન્યાં મુદ્ગરેણ મહાબલમ્ ॥ ૭॥

કાલયન્તં હરીન્ વેગાદ્ભક્ષયન્તં સમન્તતઃ ।
ચૂર્ણયન્તં મુદ્ગરેણ પાણિપાદૈરનેકધા ॥ ૮॥

કુમ્ભકર્ણં તદા દૃષ્ટ્વા ગદાપાણિર્વિભીષણઃ ।
નનામ ચરણં તસ્ય ભ્રાતુર્જ્યેષ્ઠસ્ય બુદ્ધિમાન્ ॥ ૯॥

વિભીષણોઽહં ભ્રાતુર્મે દયાં કુરુ મહામતે ।
રાવણસ્તુ મયા ભ્રાતર્બહુધા પરિબોધિતઃ ॥ ૧૦॥

સીતાં દેહીતિ રામાય રામઃ સાક્ષાજ્જનાર્દનઃ ।
ન શ ૃણોતિ ચ માં હન્તું ખડ્ગમુદ્યમ્ય ચોક્તવાન્ ॥ ૧૧॥

ધિક્ ત્વાં ગચ્છેતિ માં હત્વા પદા પાપિભિરાવૃતઃ ।
ચતુર્ભિર્મન્ત્રિભિઃ સાર્ધં રામં શરણમાગતઃ ॥ ૧૨॥

તચ્છ્રુત્વા કુમ્ભકર્ણોઽપિ જ્ઞાત્વા ભ્રાતરમાગતમ્ ।
સમાલિઙ્ગ્ય ચ વત્સ ત્વં જીવ રામપદાશ્રયાત્ ॥ ૧૩॥

કુલસંરક્ષણાર્થાય રાક્ષસાનાં હિતાય ચ ।
મહાભાગવતોઽસિ ત્વં પુરા મે નારદાચ્છ્રુતમ્ ॥ ૧૪॥

ગચ્છ તાત મમેદાનીં દૃશ્યતે ન ચ કિઞ્ચન ।
મદીયો વા પરો વાપિ મદમત્તવિલોચનઃ ॥ ૧૫॥

ઇત્યુક્તોઽશ્રુમુખો ભ્રાતુશ્ચરણાવભિવન્દ્ય સઃ ।
રામપાર્શ્વમુપાગત્ય ચિન્તાપર ઉપસ્થિતઃ ॥ ૧૬॥

કુમ્ભકર્ણોઽપિ હસ્તાભ્યાં પાદાભ્યાં પેષયન્ હરીન્ ।
ચચાર વાનરીં સેનાં કાલયન્ ગન્ધહસ્તિવત્ ॥ ૧૭॥

દૃષ્ટ્વા તં રાઘવઃ ક્રુદ્ધો વાયવ્યં શસ્ત્રમાદરાત્ ।
ચિક્ષેપ કુમ્ભકર્ણાય તેન ચિચ્છેદ રક્ષસઃ ॥ ૧૮॥

સમુદ્ગરં દક્ષહસ્તં તેન ઘોરં નનાદ સઃ ।
સ હસ્તઃ પતિતો ભૂમાવનેકાનર્દયન્ કપીન્ ॥ ૧૯॥

પર્યન્તમાશ્રિતાઃ સર્વે વાનરા ભયવેપિતાઃ ।
રામરાક્ષસયોર્યુદ્ધં પશ્યન્તઃ પર્યવસ્થિતાઃ ॥ ૨૦॥

કુમ્ભકર્ણશ્છિન્નહસ્તઃ શાલમુદ્યમ્ય વેગતઃ ।
સમરે રાઘવં હન્તું દુદ્રાવ તમથોઽચ્છિનત્ ॥ ૨૧॥

શાલેન સહિતં વામહસ્તમૈન્દ્રેણ રાઘવઃ ।
છિન્નબાહુમથાયાન્તં નર્દન્તં વીક્ષ્ય રાઘવઃ ॥ ૨૨॥

દ્વાવર્ધચન્દ્રૌ નિશિતાવાદાયાસ્ય પદદ્વયમ્ ।
ચિચ્છેદ પતિતૌ પાદૌ લઙ્કાદ્વારિ મહાસ્વનૌ ॥ ૨૩॥

નિકૃત્તપાણિપાદોઽપિ કુમ્ભકર્ણોઽતિભીષણઃ ।
વડવામુખવદ્વક્ત્રં વ્યાદાય રઘુનન્દનમ્ ॥ ૨૪॥

અભિદુદ્રાવ નિનદન્ રાહુશ્ચન્દ્રમસં યથા ।
અપૂરયચ્છિતાગ્રૈશ્ચ સાયકૈસ્તદ્રઘૂત્તમઃ ॥ ૨૫॥

શરપૂરિતવક્ત્રોઽસૌ ચુક્રોશાતિભયઙ્કરઃ ।
અથ સૂર્યપ્રતીકાશમૈન્દ્રં શરમનુત્તમમ્ ॥ ૨૬॥

વજ્રાશનિસમં રામશ્ચિક્ષેપાસુરમૃત્યવે ।
સ તત્પર્વતસઙ્કાશં સ્ફુરત્કુણ્ડલદંષ્ટ્રકમ્ ॥ ૨૭॥

ચકર્ત રક્ષોઽધિપતેઃ શિરો વૃત્રમિવાશનિઃ ।
તચ્છિરઃ પતિતં લઙ્કાદ્વારિ કાયો મહોદધૌ ॥ ૨૮॥

શિરોઽસ્ય રોધયદ્દ્વારં કાયો નક્રાદ્યચૂર્ણયત્ ।
તતો દેવાઃ સઋષયો ગન્ધર્વાઃ પન્નગાઃ ખગાઃ ॥ ૨૯॥

સિદ્ધા યક્ષા ગુહ્યકાશ્ચ અપ્સરોભિશ્ચ રાઘવમ્ ।
ઈડિરે કુસુમાસારૈર્વર્ષન્તશ્ચાભિનન્દિતાઃ ॥ ૩૦॥

આજગામ તદા રામં દ્રષ્ટું દેવમુનીશ્વરઃ ।

નારદો ગગનાત્તુર્ણં સ્વભાસા ભાસયન્ દિશઃ ॥ ૩૧॥

રામમિન્દીવરશ્યામમુદારાઙ્ગં ધનુર્ધરમ્ ।
ઈષત્તામ્રવિશાલાક્ષમૈન્દ્રાસ્ત્રાઞ્ચિતબાહુકમ્ ॥ ૩૨॥

દયાર્દ્રદૃષ્ટ્યા પશ્યન્તં વાનરાઞ્છરપીડિતાન્ ।
દૃષ્ટ્વા ગદ્ગદયા વાચા ભક્ત્યા સ્તોતું પ્રચક્રમે ॥ ૩૩॥

નારદ ઉવાચ ।
દેવદેવ જગન્નાથ પરમાત્મન્ સનાતન ।
નારાયણાખિલાધાર વિશ્વસાક્ષિન્નમોઽસ્તુ તે ॥ ૩૪॥

વિશુદ્ધજ્ઞાનરૂપોઽપિ ત્વં લોકાનતિવઞ્ચયન્ ।
માયયા મનુજાકારઃ સુખદુઃખાદિમાનિવ ॥ ૩૫॥

ત્વં માયયા ગુહ્યમાનઃ સર્વેષાં હૃદિ સંસ્થિતઃ ।
સ્વયઞ્જ્યોતિઃ સ્વભાવસ્ત્વં વ્યક્ત એવામલાત્મનામ્ ॥ ૩૬॥

ઉન્મીલયન્ સૃજસ્યેતન્નેત્રે રામ જગત્ત્રયમ્ ।
ઉપસંહ્રિયતે સર્વં ત્વયા ચક્ષુર્નિમીલનાત્ ॥ ૩૭॥

યસ્મિન્ સર્વમિદં ભાતિ યતશ્ચૈતચ્ચરાચરમ્ ।
યસ્માન્ન કિઞ્ચિલ્લોકેઽસ્મિંસ્તસ્મૈ તે બ્રહ્મણે નમઃ ॥ ૩૮॥

પ્રકૃતિં પુરુષં કાલં વ્યક્તાવ્યક્તસ્વરૂપિણમ્ ।
યં જાનન્તિ મુનિશ્રેષ્ઠાસ્તસ્મૈ રામાય તે નમઃ ॥ ૩૯॥

વિકારરહિતં શુદ્ધં જ્ઞાનરૂપં શ્રુતિર્જગૌ ।
ત્વાં સર્વજગદાકારમૂર્તિં ચાપ્યાહ સા શ્રુતિઃ ॥ ૪૦॥

વિરોધો દૃશ્યતે દેવ વૈદિકો વેદવાદિનામ્ ।
નિશ્ચયં નાધિગચ્છન્તિ ત્વત્પ્રસાદં વિના બુધાઃ ॥ ૪૧॥

માયયા ક્રીડતો દેવ ન વિરોધો મનાગપિ ।
રશ્મિજાલં રવેર્યદ્વદ્દૃશ્યતે જલવદ્ ભ્રમાત્ ॥ ૪૨॥

ભ્રાન્તિજ્ઞાનાત્તથા રામ ત્વયિ સર્વં પ્રકલ્પ્યતે ।
મનસોઽવિષયો દેવ રૂપં તે નિર્ગુણં પરમ્ ॥ ૪૩॥

કથં દૃશ્યં ભવેદ્દેવ દૃશ્યાભાવે ભજેત્કથમ્ ।
અતસ્તવાવતારેષુ રૂપાણિ નિપુણા ભુવિ ॥ ૪૪॥

ભજન્તિ બુદ્ધિસમ્પન્નાસ્તરન્ત્યેવ ભવાર્ણવમ્ ।
કામક્રોધાદયસ્તત્ર બહવઃ પરિપન્થિનઃ ॥ ૪૫॥

ભીષયન્તિ સદા ચેતો માર્જારા મૂષકં યથા ।
ત્વન્નામ સ્મરતાં નિત્યં ત્વદ્રૂપમપિ માનસે ॥ ૪૬॥

ત્વત્પૂજાનિરતાનાં તે કથામૃતપરાત્મનામ્ ।
ત્વદ્ભક્તસઙ્ગિનાં રામ સંસારો ગોષ્પદાયતે ॥ ૪૭॥

અતસ્તે સગુણં રૂપં ધ્યાત્વાહં સર્વદા હૃદિ ।
મુક્તશ્ચરામિ લોકેષુ પૂજ્યોઽહં સર્વદૈવતૈઃ ॥ ૪૮॥

રામ ત્વયા મહત્કાર્યં કૃતં દેવહિતેચ્છયા ।
કુમ્ભકર્ણવધેનાદ્ય ભૂભારોઽયં ગતઃ પ્રભો ॥ ૪૯॥

શ્વો હનિષ્યતિ સૌમિત્રિરિન્દ્રજેતારમાહવે ।
હનિષ્યસેઽથ રામ ત્વં પરશ્વો દશકન્ધરમ્ ॥ ૫૦॥

પશ્યામિ સર્વં દેવેશ સિદ્ધૈઃ સહ નભોગતઃ ।
અનુગૃહ્ણીષ્વ માં દેવ ગમિષ્યામિ સુરાલયમ્ ॥ ૫૧॥

ઇત્યુક્ત્વા રામમામન્ત્ર્ય નારદો ભગવાનૃષિઃ ।
યયૌ દેવૈઃ પૂજ્યમાનો બ્રહ્મલોકમકલ્મષમ્ ॥ ૫૨॥

ભ્રાતરં નિહતં શ્રુત્વા કુમ્ભકર્ણં મહાબલમ્ ।
રાવણઃ શોકસન્તપ્તો રામેણાક્લિષ્ટકર્મણા ॥ ૫૩॥

મૂર્ચ્છિતઃ પતિતો ભૂમાવુત્થાય વિલલાપ હ ।
પિતૃવ્યં નિહતં શ્રુત્વા પિતરં ચાતિવિહ્વલમ્ ॥ ૫૪॥

ઇન્દ્રજિત્પ્રાહ શોકાર્તં ત્યજ શોકં મહામતે ।
વ્યેતુ તે દુઃખમખિલં સ્વસ્થો ભવ મહીપતે ॥ ૫૬॥

સર્વં સમીકરિષ્યામિ હનિષ્યામિ ચ વૈ રિપૂન્ ।
ગત્વા નિકુમ્ભિલાં સદ્યસ્તર્પયિત્વા હુતાશનમ્ ॥ ૫૭॥

લબ્ધ્વા રથાદિકં તસ્માદજેયોઽહં ભવામ્યરેઃ ।
ઇત્યુક્ત્વા ત્વરિતં ગત્વા નિર્દિષ્ટં હવનસ્થલમ્ ॥ ૫૮॥

રક્તમાલ્યામ્બરધરો રક્તગન્ધાનુલેપનઃ ।

નિકુમ્ભિલાસ્થલે મૌની હવનાયોપચક્રમે ॥ ૫૯॥

વિભીષણોઽથ તચ્છ્રુત્વા મેઘનાદસ્ય ચેષ્ટિતમ્ ।
પ્રાહ રામાય સકલં હોમારમ્ભં દુરાત્મનઃ ॥ ૬૦॥

સમાપ્યતે ચેદ્ધોમોઽયં મેઘનાદસ્ય દુર્મતેઃ ।
તદાજેયો ભવેદ્રામ મેઘનાદઃ સુરાસુરૈઃ ॥ ૬૧॥

અતઃ શીઘ્રં લક્ષ્મણેન ઘાતયિષ્યામિ રાવણિમ્ ।
આજ્ઞાપય મયા સાર્ધં લક્ષ્મણં બલિનાં વરમ્ ।
હનિષ્યતિ ન સન્દેહો મેઘનાદં તવાનુજઃ ॥ ૬૨॥

શ્રીરામચન્દ્ર ઉવાચ ।
અહમેવાગમિષ્યામિ હન્તુમિન્દ્રજિતં રિપુમ્ ।
આગ્નેયેન મહાસ્ત્રેણ સર્વરાક્ષસઘાતિના ॥ ૬૩॥

વિભીષણોઽપિ તં પ્રાહ નાસાવન્યૈર્નિહન્યતે ।
યસ્તુ દ્વાદશ વર્ષાણિ નિદ્રાહારવિવર્જિતઃ ॥ ૬૪॥

તેનૈવ મૃત્યુર્નિર્દિષ્ટો બ્રહ્મણાસ્ય દુરાત્મનઃ ।
લક્ષ્મણસ્તુ અયોધ્યાયા નિર્ગમ્યાયાત્ત્વયા સહ ॥ ૬૫॥

તદાદિ નિદ્રાહારાદીન્ન જાનાતિ રઘૂત્તમ ।
સેવાર્થં તવ રાજેન્દ્ર જ્ઞાતં સર્વમિદં મયા ॥ ૬૬॥

તદાજ્ઞાપય દેવેશ લક્ષ્મણં ત્વરયા મયા ।
હનિષ્યતિ ન સન્દેહઃ શેષઃ સાક્ષાદ્ધરાધરઃ ॥ ૬૭॥

ત્વમેવ સાક્ષાજ્જગતામધીશો
નારાયણો લક્ષ્મણ એવ શેષઃ ।
યુવાં ધરાભારનિવારણાર્થં
જાતૌ જગન્નાટકસૂત્રધારૌ ॥ ૬૮॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે યુદ્ધકાણ્ડે અષ્ટમઃ
સર્ગઃ ॥ ૮॥

## ॥ નવમઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
વિભીષણવચઃ શ્રુત્વા રામો વાક્યમથાબ્રવીત્ ।
જાનામિ તસ્ય રૌદ્રસ્ય માયાં કૃત્સ્નાં વિભીષણ ॥ ૧॥

સ હિ બ્રહ્માસ્ત્રવિચ્છૂરો માયાવી ચ મહાબલઃ ।
જાનામિ લક્ષ્મણસ્યાપિ સ્વરૂપં મમ સેવનમ્ ॥ ૨॥

જ્ઞાત્વૈવાસમહં તૂષ્ણીં ભવિષ્યત્કાર્યગૌરવાત્ ।
ઇત્યુક્ત્વા લક્ષ્મણં પ્રાહ રામો જ્ઞાનવતાં વરઃ ॥ ૩॥

ગચ્છ લક્ષ્મણ સૈન્યેન મહતા જહિ રાવણિમ્ ।
હનૂમત્પ્રમુખૈઃ સર્વૈર્યૂથપૈઃ સહ લક્ષ્મણ ॥ ૪॥

જામ્બવાનૃક્ષરાજોઽયં સહ સૈન્યેન સંવૃતઃ ।
વિભીષણશ્ચ સચિવૈઃ સહ ત્વામભિયાસ્યતિ ॥ ૫॥

અભિજ્ઞસ્તસ્ય દેશસ્ય જાનાતિ વિવરાણિ સઃ ।
રામસ્ય વચનં શ્રુત્વા લક્ષ્મણઃ સવિભીષણઃ ॥ ૬॥

જગ્રાહ કાર્મુકં શ્રેષ્ઠમન્યદ્ભીમપરાક્રમઃ ।
રામપાદામ્બુજં સ્પૃષ્ટ્વા હૃષ્ટઃ સૌમિત્રિરબ્રવીત્ ॥ ૭॥

અદ્ય મત્કાર્મુકાન્મુક્તાઃ  શરા નિર્ભિદ્ય રાવણિમ્ ।
ગમિષ્યન્તિ હિ પાતાલં સ્નાતું ભોગવતીજલે ॥ ૮॥

એવમુક્ત્વા સ સૌમિત્રિઃ પરિક્રમ્ય પ્રણમ્ય તમ્ ।
ઇન્દ્રજિન્નિધનાકાઙ્ક્ષી યયૌ ત્વરિતવિક્રમઃ ॥ ૯॥

વાનરૈર્બહુસાહસ્રૈર્હનૂમાન્ પૃષ્ઠતોઽન્વગાત્ ।
વિભીષણશ્ચ સહિતો મન્ત્રિભિસ્ત્વરિતં યયૌ ॥ ૧૦॥

જામ્બવત્પ્રમુખા ઋક્ષાઃ સૌમિત્રિં ત્વરયાન્વયુઃ ।
ગત્વા નિકુમ્ભિલાદેશં લક્ષ્મણો વાનરૈઃ સહ ॥ ૧૧॥

અપશ્યદ્બલસઙ્ઘાતં દૂરાદ્રાક્ષસસઙ્કુલમ્ ।
ધનુરાયમ્ય સૌમિત્રિર્યત્તોઽભૂદ્ભૂરિવિક્રમઃ ॥ ૧૨॥

અઙ્ગદેન ચ વીરેણ જામ્બવાન્ રાક્ષસાધિપઃ ।
તદા વિભીષણઃ પ્રાહ સૌમિત્રિં પશ્ય રાક્ષસાન્ ॥ ૧૩॥

યદેતદ્રાક્ષસાનીકં મેઘશ્યામં વિલોક્યતે ।
અસ્યાનીકસ્ય મહતો ભેદને યત્નવાન્ ભવ ॥ ૧૪॥

રાક્ષસેન્દ્રસુતોઽપ્યસ્મિન્ ભિન્ને દૃશ્યો ભવિષ્યતિ ।
અભિદ્રવાશુ યાવદ્વૈ નૈતત્કર્મ સમાપ્યતે ॥ ૧૫॥

જહી વીર દુરાત્માનં હિંસાપરમધાર્મિકમ્ ।
વિભીષણવચઃ શ્રુત્વા લક્ષ્મણઃ શુભલક્ષ્મણઃ ॥ ૧૬॥

વવર્ષ શરવર્ષાણિ રાક્ષસેન્દ્રસુતં પ્રતિ ।
પાષાણૈઃ પર્વતાગ્રૈશ્ચ વૃક્ષૈશ્ચ હરિયૂથપાઃ ॥ ૧૭॥

નિર્જઘ્નુઃ સર્વતો દૈત્યાંસ્તેઽપિ વાનરયૂથપાન્ ।
પરશ્વધૈઃ શિતૈર્બાણૈરસિભિર્યષ્ટિતોમરૈઃ ॥ ૧૮॥

નિર્જઘ્નુર્વાનરાનીકં તદા શબ્દો મહાનભૂત્ ।
સ સમ્પ્રહારસ્તુમુલઃ સઞ્જજ્ઞે હરિરક્ષસામ્ ॥ ૧૯॥

ઇન્દ્રજિત્સ્વબલં સર્વમર્દ્યમાનં વિલોક્ય સઃ ।
નિકુમ્ભિલાં ચ હોમં ચ ત્યક્ત્વા શીઘ્રં વિનિર્ગતઃ ॥ ૨૦॥

રથમારુહ્ય સધનુઃ ક્રોધેન મહતાગમત્ ।
સમાહ્વયન્ સ સૌમિત્રિં યુદ્ધાય રણમૂર્ધનિ ॥ ૨૧॥

સૌમિત્રે મેઘનાદોઽહં મયા જીવન્ન મોક્ષ્યસે ।
તત્ર દૃષ્ટ્વા પિતૃવ્યં સ પ્રાહ નિષ્ઠુરભાષણમ્ ॥ ૨૨॥

ઇહૈવ જાતઃ સંવૃદ્ધઃ સાક્ષાદ્ ભ્રાતા પિતુર્મમ ।
યસ્ત્વં સ્વજનમુત્સૃજ્ય પરભૃત્યત્વમાગતઃ ॥ ૨૩॥

કથં દ્રુહ્યસિ પુત્રાય પાપીયાનસિ દુર્મતિઃ ।
ઇત્યુક્ત્વા લક્ષ્મણં દૃષ્ટ્વા હનૂમત્પૃષ્ઠતઃ સ્થિતમ્ ॥ ૨૪॥

ઉદ્યદાયુધનિસ્ત્રિંશે રથે મહતિ સંસ્થિતઃ ।
મહાપ્રમાણમુદ્યમ્ય ઘોરં વિસ્ફારયન્ ધનુઃ ॥ ૨૫॥

અદ્ય વો મામકા બાણાઃ પ્રાણાન્ પાસ્યન્તિ વાનરાઃ ।
તતઃ શરં દાશરથિઃ સન્ધાયામિત્રકર્ષણઃ ॥ ૨૬॥

સસર્જ રાક્ષસેન્દ્રાય ક્રુદ્ધઃ સર્પ ઇવ શ્વસન્ ।

ઇન્દ્રજિદ્રક્તનયનો લક્ષ્મણં સમુદૈક્ષત ॥ ૨૭॥

શક્રાશનિસમસ્પર્શૈર્લક્ષ્મણેનાહતઃ શરૈઃ ।
મુહૂર્તમભવન્મૂઢઃ પુનઃ પ્રત્યાહૃતેન્દ્રિયઃ ॥ ૨૮॥

દદર્શાવસ્થિતં વીરં વીરો દશરથાત્મજમ્ ।
સોઽભિચક્રામ સૌમિત્રિં ક્રોધસંરક્તલોચનઃ ॥ ૨૯॥

શરાન્ ધનુષિ સન્ધાય લક્ષ્મણં ચેદમબ્રવીત્ ।
યદિ તે પ્રથમે યુદ્ધે ન દૃષ્ટો મે પરાક્રમઃ ॥ ૩૦॥

અદ્ય ત્વાં દર્શયિષ્યામિ તિષ્ઠેદાનીં વ્યવસ્થિતઃ ।
ઇત્યુક્ત્વા સપ્તભિર્બાણૈરભિવિવ્યાધ લક્ષ્મણમ્ ॥ ૩૧॥

દશભિશ્ચ હનૂમન્તં તીક્ષ્ણધારૈઃ શરોત્તમૈઃ ।
તતઃ શરશતેનૈવ સમ્પ્રયુક્તેન વીર્યવાન્ ॥ ૩૨॥

ક્રોધદ્વિગુણસંરબ્ધો નિર્બિભેદ વિભીષણમ્ ।
લક્ષ્મણોઽપિ તથા શત્રું શરવર્ષૈરવાકિરત્ ॥ ૩૩॥

તસ્ય બાણૈઃ સુસંવિદ્ધં કવચં કાઞ્ચનપ્રભમ્ ।
વ્યશીર્યત રથોપસ્થે તિલશઃ પતિતં ભુવિ ॥ ૩૪॥

તતઃ શરસહસ્રેણ સઙ્ક્રુદ્ધો રાવણાત્મજઃ ।
બિભેદ સમરે વીરં લક્ષ્મણં ભીમવિક્રમમ્ ॥ ૩૫॥

વ્યશીર્યતાપતદ્દિવ્યં કવચં લક્ષ્મણસ્ય ચ ।
કૃતપ્રતિકૃતાન્યોન્યં બભૂવતુરભિદ્રુતૌ ॥ ૩૬॥

અભીક્ષ્ણં નિઃશ્વસન્તૌ તૌ યુધ્યેતાં તુમુલં પુનઃ ।
શરસંવૃતસર્વાઙ્ગૌ સર્વતો રુધિરોક્ષિતૌ ॥ ૩૭॥

સુદીર્ઘકાલં તૌ વીરાવન્યોન્યં નિશિતૈઃ શરૈઃ ।
અયુધ્યેતાં મહાસત્ત્વૌ જયાજયવિવર્જિતૌ ॥ ૩૮॥

એતસ્મિન્નન્તરે વીરો લક્ષ્મણઃ પઞ્ચભિઃ શરૈઃ ।
રાવણેઃ સારથિં સાશ્વં રથં ચ સમચૂર્ણયત્ ॥ ૩૯॥

ચિચ્છેદ કાર્મુકં તસ્ય દર્શયન્ હસ્તલાઘવમ્ ।
સોઽન્યત્તુ કાર્મુકં ભદ્રં સજ્યં ચક્રે ત્વરાન્વિતઃ ॥ ૪૦॥

તચ્ચાપમપિ ચિચ્છેદ લક્ષ્મણસ્ત્રિભિરાશુગૈઃ ।
તમેવ છિન્નધન્વાનં વિવ્યાધાનેકસાયકૈઃ ॥ ૪૧॥

પુનરન્યત્સમાદાય કાર્મુકં ભીમવિક્રમઃ ।
ઇન્દ્રજિલ્લક્ષ્મણં બાણૈઃ શિતૈરાદિત્યસન્નિભૈઃ ॥ ૪૨॥

બિભેદ વાનરાન્ સર્વાન્ બાણૈરાપૂરયન્ દિશઃ ।
તત ઐન્દ્રં સમાદાય લક્ષ્મણો રાવણિં પ્રતિ ॥ ૪૩॥

સન્ધાયાકૃષ્ય કર્ણાન્તં કાર્મુકં દૃઢનિષ્ઠુરમ્ ।
ઉવાચ લક્ષ્મણો વીરઃ સ્મરન્ રામપદામ્બુજમ્ ॥ ૪૪॥

ધર્માત્મા સત્યસન્ધશ્ચ રામો દાશરથિર્યદિ ।
ત્રિલોક્યામપ્રતિદ્વન્દ્વસ્તદેનં જહિ રાવણિમ્ ॥ ૪૫॥

ઇત્યુક્ત્વા બાણમાકર્ણાદ્વિકૃષ્ય તમજિમ્હગમ્ ।
લક્ષ્મણઃ સમરે વીરઃ સસર્જેન્દ્રજિતં પ્રતિ ॥ ૪૬॥

સ શરઃ સશિરસ્ત્રાણં શ્રીમજ્જ્વલિતકુણ્ડલમ્ ।
પ્રમથ્યેન્દ્રજિતઃ કાયાત્પાતયામાસ ભૂતલે ॥ ૪૭॥

તતઃ પ્રમુદિતા દેવાઃ કીર્તયન્તો રઘૂત્તમમ્ ।
વવર્ષુઃ પુષ્પવર્ષાણિ સ્તુવન્તશ્ચ મુહુર્મુહુઃ ॥ ૪૮॥

જહર્ષ શક્રો ભગવાન્ સહ દેવૈર્મહર્ષિભિઃ ।
આકાશેઽપિ ચ દેવાનાં શુશ્રુવે દુન્દુભિસ્વનઃ ॥ ૪૯॥

વિમલં ગગનં ચાસીત્સ્થિરાભૂદ્વિશ્વધારિણી ।
નિહતં રાવણિં દૃષ્ટ્વા જયજલ્પસમન્વિતઃ ॥ ૫૦॥

ગતશ્રમઃ સ સૌમિત્રિઃ શઙ્ખમાપૂરયદ્રણે ।
સિંહનાદં તતઃ કૃત્વા જ્યાશબ્દમકરોદ્વિભુઃ ॥ ૫૧॥

તેન નાદેન સંહૃષ્ટા વાનરાશ્ચ ગતશ્રમાઃ ।
વાનરેન્દ્રૈશ્ચ સહિતઃ સ્તુવદ્ભિર્હૃષ્ટમાનસૈઃ ॥ ૫૨॥

લક્ષ્મણઃ પરિતુષ્ટાત્મા દદર્શાભ્યેત્ય રાઘવમ્ ।
હનૂમદ્રાક્ષસાભ્યાં ચ સહિતો વિનયાન્વિતઃ ॥ ૫૩॥

વવન્દે ભ્રાતરં રામં જ્યેષ્ઠં નારાયણં વિભુમ્ ।
ત્વત્પ્રસાદાદ્રઘુશ્રેષ્ઠ હતો રાવણિરાહવે ॥ ૫૪॥

શ્રુત્વા તલ્લક્ષ્મણાદ્ભક્ત્યા તમાલિઙ્ગ્ય રઘૂત્તમઃ ।
મૂર્ધ્ન્યવઘ્રાય મુદિતઃ સસ્નેહમિદમબ્રવીત્ ॥ ૫૫॥

સાધુ લક્ષ્મણ તુષ્ટોઽસ્મિ કર્મ તે દુષ્કરં કૃતમ્ ।
મેઘનાદસ્ય નિધને જિતં સર્વમરિન્દમ ॥ ૫૬॥

અહોરાત્રૈસ્ત્રિભિર્વીરઃ કથઞ્ચિદ્વિનિપાતિતઃ ।
નિઃસપત્નઃ કૃતોઽસ્મ્યદ્ય નિર્યાસ્યતિ હિ રાવણઃ ॥ ૫૭॥

પુત્રશોકાન્મયા યોદ્ધું તં હનિષ્યામિ રાવણમ્ ॥ ૫૮॥

મેઘનાદં હતં શ્રુત્વા લક્ષ્મણેન મહાબલમ્ ।
રાવણઃ પતિતો ભુમૌ મૂર્ચ્છિતઃ પુનરુત્થિતઃ ।
વિલલાપાતિદીનાત્મા પુત્રશોકેન રાવણઃ ॥ ૫૯॥

પુત્રસ્ય ગુણકર્માણિ સંસ્મરન્ પર્યદેવયત્ ।
અદ્ય દેવગણાઃ સર્વે લોકપાલા મહર્ષયઃ ॥ ૬૦॥

હતમિન્દ્રજિતં જ્ઞાત્વા સુખં સ્વપ્સ્યન્તિ નિર્ભયાઃ ।
ઇત્યાદિ બહુશઃ પુત્રલાલસો વિલલાપ હ ॥ ૬૧॥

તતઃ પરમસઙ્ક્રુદ્ધો રાવણો રાક્ષસાધિપઃ ।
ઉવાચ રાક્ષસાન્ સર્વાન્નિનાશયિષુરાહવે ॥ ૬૨॥

સ પુત્રવધસન્તપ્તઃ શૂરઃ ક્રોધવશં ગતઃ ।
સંવીક્ષ્ય રાવણો બુદ્ધ્યા હન્તું સીતાં પ્રદુદ્રુવે ॥ ૬૩॥

ખડ્ગપાણિમથાયાન્તં ક્રુદ્ધં દૃષ્ટ્વા દશાનનમ્ ।
રાક્ષસીમધ્યગા સીતા ભયશોકાકુલાભવત્ ॥ ૬૪॥

એતસ્મિન્નન્તરે તસ્ય સચિવો બુદ્ધિમાન્ શુચિઃ ।
સુપાર્શ્વો નામ મેધાવી રાવણં વાક્યમબ્રવીત્ ॥ ૬૫॥

નનુ નામ દશગ્રીવ સાક્ષાદ્વૈશ્રવણાનુજઃ ।
વેદવિદ્યાવ્રતસ્નાતઃ સ્વકર્મપરિનિષ્ઠિતઃ ॥ ૬૬॥

અનેકગુણસમ્પન્નઃ કથં સ્ત્રીવધમિચ્છસિ ।
અસ્માભિઃ સહિતો યુદ્ધે હત્વા રામં ચ લક્ષ્મણમ્ ।
પ્રાપ્સ્યસે જાનકીં શીઘ્રમિત્યુક્તઃ સ ન્યવર્તત ॥ ૬૭॥

તતો દુરાત્મા સુહૃદા નિવેદિતં
વચઃ સુધર્મ્યં પ્રતિગૃહ્ય રાવણઃ ।
ગૃહં જગામાશુ શુચા વિમૂઢધીઃ
પુનઃ સભાં ચ પ્રયયૌ સુહૃદ્વૃતઃ ॥ ६८॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે યુદ્ધકાણ્ડે નવમઃ
સર્ગઃ ॥ ૯॥

## ॥ દશમઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
સ વિચાર્ય સભામધ્યે રાક્ષસૈઃ સહ મન્ત્રિભિઃ ।
નિર્યયૌ યેઽવશિષ્ટાસ્તૈ રાક્ષસૈઃ સહ રાઘવમ્ ॥ ૧॥

શલભઃ શલભૈર્યુક્તઃ પ્રજ્વલન્તમિવાનલમ્ ।
તતો રામેણ નિહતાઃ સર્વે તે રાક્ષસા યુધિ ॥ ૨॥

સ્વયં રામેણ નિહતસ્તીક્ષ્ણબાણેન વક્ષસિ ।
વ્યથિતસ્ત્વરિતં લઙ્કાં પ્રવિવેશ દશાનનઃ ॥ ૩॥

દૃષ્ટ્વા રામસ્ય બહુશઃ પૌરુષં ચાપ્યમાનુષમ્ ।
રાવણો મારુતેશ્ચૈવ શીઘ્રં શુક્રાન્તિકં યયૌ ॥ ૪॥

નમસ્કૃત્ય દશગ્રીવઃ શુક્રં પ્રાઞ્જલિરબ્રવીત્ ।
ભગવન્ રાઘવેણૈવં લઙ્કા રાક્ષસયુથપૈઃ ॥ ૫॥

વિનાશિતા મહાદૈત્યા નિહતાઃ પુત્રબાન્ધવાઃ ।
કથં મે દુઃખસન્દોહસ્ત્વયિ તિષ્ઠતિ સદ્ગુરૌ ॥ ૬॥

ઇતિ વિજ્ઞાપિતો દૈત્યગુરુઃ પ્રાહ દશાનનમ્ ।
હોમં કુરુ પ્રયત્નેન રહસિ ત્વં દશાનન ॥ ૭॥

યદિ વિઘ્નો ન ચેદ્ધોમે તર્હિ હોમાનલોત્થિતઃ ॥ ૮॥

મહાન્ રથશ્ચ વાહાશ્ચ ચાપતૂણીરસાયકાઃ ।
સમ્ભવિષ્યન્તિ તૈર્યુક્તસ્ત્વમજેયો ભવિષ્યસિ ॥ ૯॥

ગૃહાણ મન્ત્રાન્ મદ્દત્તાન્ ગચ્છ હોમં કુરુ દ્રુતમ્ ।

ઇત્યુક્તસ્ત્વરિતં ગત્વા રાવણો રાક્ષસાધિપઃ ॥ ૧૦॥

ગુહાં પાતાલસદૃશીં મન્દિરે સ્વે ચકાર હ ।
લઙ્કાદ્વારકપાટાદિ બદ્ધ્વા સર્વત્ર યત્નતઃ ॥ ૧૧॥

હોમદ્રવ્યાણિ સમ્પાદ્ય યાન્યુક્તાન્યાભિચારિકે ।
ગુહાં પ્રવિશ્ય ચૈકાન્તે મૌની હોમં પ્રચક્રમે ॥ ૧૨॥

ઉત્થિતં ધૂમમાલોક્ય મહાન્તં રાવણાનુજઃ ।
રામાય દર્શયામાસ હોમધૂમં ભયાકુલઃ ॥ ૧૩॥

પશ્ય રામ દશગ્રીવો હોમં કર્તું સમારભત્ ।
યદિ હોમઃ સમાપ્તઃ સ્યાત્તદાઽજેયો ભવિષ્યતિ ॥ ૧૪॥

અતો વિઘ્નાય હોમસ્ય પ્રેષયાશુ હરીશ્વરાન્ ।
તથેતિ રામઃ સુગ્રીવસમ્મતેનાઙ્ગદં કપિમ્ ॥ ૧૫॥

હનૂમત્પ્રમુખાન્ વીરાનાદિદેશ મહાબલાન્ ।
પ્રાકારં લઙ્ઘયિત્વા તે ગત્વા રાવણમન્દિરમ્ ॥ ૧૬॥

દશકોટ્યઃ પ્લવઙ્ગાનાં ગત્વા મન્દિરરક્ષકાન્ ।
ચૂર્ણયામાસુરશ્વાંશ્ચ ગજાંશ્ચ ન્યહનન્ ક્ષણાત્ ॥ ૧૭॥

તતશ્ચ સરમા નામ પ્રભાતે હસ્તસઞ્જ્ઞયા ।
વિભીષણસ્ય ભાર્યા સા હોમસ્થાનમસૂચયત્ ॥ ૧૮॥

ગુહાપિધાનપાષાણમઙ્ગદઃ પાદઘટ્ટનૈઃ ।
ચૂર્ણયિત્વા મહાસત્ત્વઃ પ્રવિવેશ મહાગુહામ્ ॥ ૧૯॥

દૃષ્ટ્વા દશાનનં તત્ર મીલિતાક્ષં દૃઢાસનમ્ ।
તતોઽઙ્ગદાજ્ઞયા સર્વે વાનરા વિવિશુર્દ્રુતમ્ ॥ ૨૦॥

તત્ર કોલાહલં ચક્રુસ્તાડયન્તશ્ચ સેવકાન્ ।
સમ્ભારાંશ્ચિક્ષિપુસ્તસ્ય હોમકુણ્ડે સમન્તતઃ ॥ ૨૧॥

સ્રુવમાચ્છિદ્ય હસ્તાચ્ચ રાવણસ્ય બલાદ્રુષા ।
તેનૈવ સઞ્જઘાનાશુ હનૂમાન્ પ્લવગાગ્રણીઃ ॥ ૨૨॥

ઘ્નન્તિ દન્તૈશ્ચ કાષ્ઠૈશ્ચ વાનરાસ્તમિતસ્તતઃ ।
ન જહૌ રાવણો ધ્યાનં હતોઽપિ વિજિગીષયા ॥ ૨૩॥

પ્રવિશ્યાન્તઃપુરે વેશ્મન્યઙ્ગદો વેગવત્તરઃ ।
સમાનયત્કેશબન્ધે ધૃત્વા મન્દોદરીં શુભામ્ ॥ । ૨૪॥

રાવણસ્યૈવ પુરતો વિલપન્તીમનાથવત્ ।
વિદદારાઙ્ગદસ્તસ્યાઃ કઞ્ચુકં રત્નભૂષિતમ્ ॥ ૨૫॥

મુક્તા વિમુક્તાઃ પતિતાઃ સમન્તાદ્રત્નસઞ્ચયૈઃ ।
શ્રોણિસૂત્રં નિપતિતં ત્રુટિતં રત્નચિત્રિતમ્ ॥ ૨૬॥

કટિપ્રદેશાદ્વિસ્રસ્તા નીવી તસ્યૈવ પશ્યતઃ ।
ભૂષણાનિ ચ સર્વાણિ પતિતાનિ સમન્તતઃ ॥ ૨૭॥

દેવગન્ધર્વકન્યાશ્ચ નીતા હૃષ્ટૈઃ પ્લવઙ્ગમૈઃ ।
મન્દોદરી રુરોદાથ રાવણસ્યાગ્રતો ભૃશમ્ ॥ ૨૮॥

ક્રોશન્તી કરુણં દીના જગાદ દશકન્ધરમ્ ।
નિર્લજ્જોઽસિ પરૈરેવં કેશપાશે વિકૃષ્યતે ॥ ૨૯॥

ભાર્યા તવૈવ પુરતઃ કિં જુહોષિ ન લજ્જસે ।
હન્યતે પશ્યતો યસ્ય ભાર્યા પાપૈશ્ચ શત્રુભિઃ ॥ ૩૦॥

મર્તવ્યં તેન તત્રૈવ જીવિતાન્મરણં વરમ્ ।
હા મેઘનાદ તે માતા ક્લિશ્યતે બત વાનરૈઃ ॥ ૩૧॥

ત્વયિ જીવતિ મે દુઃખમીદૃશં ચ કથં ભવેત્ ।
ભાર્યા લજ્જા ચ સન્ત્યક્તા ભર્ત્રા મે જીવિતાશયા ॥ ૩૨॥

શ્રુત્વા તદ્દેવિતં રાજા મન્દોદર્યા દશાનનઃ ।
ઉત્તસ્થૌ ખડ્ગમાદાય ત્યજ દેવીમિતિ બ્રુવન્ ॥ ૩૩॥

જઘાનાઙ્ગદમવ્યગ્રઃ કટિદેશે દશાનનઃ ।
તદોત્સૃજ્ય યયુઃ સર્વે વિધ્વંસ્ય હવનં મહત્ ॥ ૩૪॥

રામપાર્શ્વમુપાગમ્ય તસ્થુઃ સર્વે પ્રહર્ષિતાઃ ॥ ૩૫॥

રાવણસ્તુ તતો ભાર્યામુવાચ પરિસાન્ત્વયન્ ।
દૈવાધીનમિદં ભદ્રે જીવતા કિં ન દૃશ્યતે ।
ત્યજ શોકં વિશાલાક્ષિ જ્ઞાનમાલમ્બ્ય નિશ્ચિતમ્ ॥ ૩૬॥

અજ્ઞાનપ્રભવઃ શોકઃ શોકો જ્ઞાનવિનાશકૃત્ ।
અજ્ઞાનપ્રભવાહન્ધીઃ શરીરાદિષ્વનાત્મસુ ॥ ૩૭॥

તન્મૂલઃ પુત્રદારાદિસમ્બન્ધઃ સંસૃતિસ્તતઃ ।
હર્ષશોકભયક્રોધલોભમોહસ્પૃહાદયઃ ॥ ૩૮॥

અજ્ઞાનપ્રભવા હ્યેતે જન્મમૃત્યુજરાદયઃ ।
આત્મા તુ કેવલં શુદ્ધો વ્યતિરિક્તો હ્યલેપકઃ ॥ ૩૯॥

આનન્દરૂપો જ્ઞાનાત્મા સર્વભાવવિવર્જિતઃ ।
ન સંયોગો વિયોગો વા વિદ્યતે કેનચિત્સતઃ ॥ ૪૦॥

એવં જ્ઞાત્વા સ્વમાત્માનં ત્યજ શોકમનિન્દિતે ।
ઇદાનીમેવ ગચ્છામિ હત્વા રામં સલક્ષ્મણમ્ ॥ ૪૧॥

આગમિષ્યામિ નો ચેન્માં દારયિષ્યતિ સાયકૈઃ ।
શ્રીરામો વજ્રકલ્પૈશ્ચ તતો ગચ્છામિ તત્પદમ્ ॥ ૪૨॥

તદા ત્વયા મે કર્તવ્યા ક્રિયા મચ્છાસનાત્પ્રિયે ।
સીતાં હત્વા મયા સાર્ધં ત્વં પ્રવેક્ષ્યસિ પાવકમ્ ॥ ૪૩॥

એવં શ્રુત્વા વચસ્તસ્ય રાવણસ્યાતિદુઃખિતા ।
ઉવાચ નાથ મે વાક્યં શ‍ૃણુ સત્યં તથા કુરુ ॥ ૪૪॥

શક્યો ન રાઘવો જેતું ત્વયા ચાન્યૈઃ કદાચન ।
રામો દેવવરઃ સાક્ષાત્પ્રધાનપુરુષેશ્વરઃ ॥ ૪૫॥

મત્સ્યો ભૂત્વા પુરા કલ્પે મનું વૈવસ્વતં પ્રભુઃ ।
રરક્ષ સકલાપદ્ભ્યો રાઘવો ભક્તવત્સલઃ ॥ ૪૬॥

રામઃ કૂર્મોઽભવત્પૂર્વં લક્ષયોજનવિસ્તૃતઃ ।
સમુદ્રમથને પૃષ્ઠે દધાર કનકાચલમ્ ॥ ૪૭॥

હિરણ્યાક્ષોઽતિદુર્વૃત્તો હતોઽનેન મહાત્મના ।
ક્રોડરૂપેણ વપુષા ક્ષોણીમુદ્ધરતા ક્વચિત્ ॥ ૪૮॥

ત્રિલોકકણ્ટકં દૈત્યં હિરણ્યકશિપું પુરા ।
હતવાન્નારસિંહેન વપુષા રઘુનન્દનઃ ॥ ૪૯॥

વિક્રમૈસ્ત્રિભિરેવાસૌ બલિં બદ્ધ્વા જગત્ત્રયમ્ ।
આક્રમ્યાદાત્સુરેન્દ્રાય ભૃત્યાય રઘુસત્તમઃ ॥ ૫૦॥

રાક્ષસાઃ ક્ષત્રિયાકારા જાતા ભૂમેર્ભરાવહાઃ ।

તાન્ હત્વા બહુશો રામો ભુવં જિત્વા હ્યદાન્મુનેઃ ॥ ૫૧॥

સ એવ સામ્પ્રતં જાતો રઘુવંશે પરાત્પરઃ ।
ભવદર્થે રઘુશ્રેષ્ઠો માનુષત્વમુપાગતઃ ॥ ૫૨॥

તસ્ય ભાર્યા કિમર્થં વા હૃતા સીતા વનાદ્બલાત્ ।
મમ પુત્રવિનાશાર્થં સ્વસ્યાપિ નિધનાય ચ ॥ ૫૩॥

ઇતઃ પરં વા વૈદેહીં પ્રેષયસ્વ રઘૂત્તમે ।
વિભીષણાય રાજ્યં તુ દત્ત્વા ગચ્છામહે વનમ્ ॥ ૫૪॥

મન્દોદરીવચઃ શ્રુત્વા રાવણો વાક્યમબ્રવીત્ ।
કથં ભદ્રે રણે પુત્રાન્ ભ્રાતૄન્ રાક્ષસમણ્ડલમ્ ॥ ૫૫॥

ઘાતયિત્વા રાઘવેણ જીવામિ વનગોચરઃ ।
રામેણ સહ યોત્સ્યામિ રામબાણૈઃ સુશીઘ્રગૈઃ ॥ ૫૬॥

વિદાર્યમાણો યાસ્યામિ તદ્વિષ્ણોઃ પરમં પદમ્ ।
જાનામિ રાઘવં વિષ્ણું લક્ષ્મીં જાનામિ જાનકીમ્ ।
જ્ઞાત્વૈવ જાનકી સીતા મયાનીતા વનાદ્બલાત્ ॥ ૫૭॥

રામેણ નિધનં પ્રાપ્ય યાસ્યામીતિ પરં પદમ્ ।
વિમુચ્ય ત્વાં તુ સંસારાદ્ગમિષ્યામિ સહ પ્રિયે ॥ ૫૮॥

પરાનન્દમયી શુદ્ધા સેવ્યતે યા મુમુક્ષુભિઃ ।
તાં ગતિં તુ ગમિષ્યામિ હતો રામેણ સંયુગે ॥ ૫૯॥

પ્રક્ષાલ્ય કલ્મષાણીહ મુક્તિં યાસ્યામિ દુર્લભામ્ ॥ ૬૦॥

ક્લેશાદિપઞ્ચકતરઙ્ગયુતં ભ્રમાઢ્યં
    દારાત્મજાપ્તધનબન્ધુઝષાભિયુક્તમ્ ।
ઔર્વાનલાભનિજરોષમનઙ્ગજાલં
    સંસારસાગરમતીત્ય હરિં વ્રજામિ ॥ ૬૧॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે યુદ્ધકાણ્ડે દશમઃ
સર્ગઃ ॥ ૧૦॥

## ॥ એકાદશઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
ઇત્યુક્ત્વા વચનં પ્રેમ્ણા રાજ્ઞીં મન્દોદરીં તદા ।
રાવણઃ પ્રયયૌ યોદ્ધું રામેણ સહ સંયુગે ॥ ૧॥

દૃઢં સ્યન્દનમાસ્થાય વૃતો ઘોરૈર્નિશાચરૈઃ ।
ચક્રૈઃ ષોડશભિર્યુક્તં સવરૂથં સકૂબરમ્ ॥ ૨॥

પિશાચવદનૈર્ઘોરૈઃ ખરૈર્યુક્તં ભયાવહમ્ ।
સર્વાસ્ત્રશસ્ત્રસહિતં સર્વોપસ્કરસંયુતમ્ ॥ ૩॥

નિશ્ચક્રામાથ સહસા રાવણો ભીષણાકૃતિઃ ।
આયાન્તં રાવણં દૃષ્ટ્વા ભીષણં રણકર્કશમ્ ॥ ૪॥

સન્ત્રસ્તાભૂત્તદા સેના વાનરી રામપાલિતા ॥ ૫॥

હનૂમાનથ ચોત્પ્લુત્ય રાવણં યોદ્ધુમાયયૌ ।
આગત્ય હનુમાન્ રક્ષોવક્ષસ્યતુલવિક્રમઃ ॥ ૬॥

મુષ્ટિબન્ધં દૃઢં બદ્ધ્વા તાડયામાસ વેગતઃ ।
તેન મુષ્ટિપ્રહારેણ જાનુભ્યામપતદ્રથે ॥ ૭॥

મૂર્ચ્છિતોઽથ મુહૂર્તેન રાવણઃ પુનરુત્થિતઃ ।
ઉવાચ ચ હનૂમન્તં શૂરોઽસિ મમ સમ્મતઃ ॥ ૮॥

હનૂમાનાહ તં ધિઙ્માં યસ્ત્વં જીવસિ રાવણ ।
ત્વં તાવન્મુષ્ટિના વક્ષો મમ તાડય રાવણ ॥ ૯॥

પશ્ચાન્મયા હતઃ પ્રાણાન્મોક્ષ્યસે નાત્ર સંશયઃ ।
તથેતિ મુષ્ટિના વક્ષો રાવણેનાપિ તાડિતઃ ॥ ૧૦॥

વિઘૂર્ણમાનનયનઃ કિઞ્ચિત્કશ્મલમાયયૌ ।
સઞ્જ્ઞામવાપ્ય કપિરાડ્ રાવણં હન્તુમુદ્યતઃ ॥ ૧૧॥

તતોઽન્યત્ર ગતો ભીત્યા રાવણો રાક્ષસાધિપઃ ।
હનૂમાનઙ્ગદશ્ચૈવ નલો નીલસ્તથૈવ ચ ॥ ૧૨॥

ચત્વારઃ સમવેત્યાગ્રે દૃષ્ટ્વા રાક્ષસપુઙ્ગવાન્ ।
અગ્નિવર્ણં તથા સર્પરોમાણં ખડ્ગરોમકમ્ ॥ ૧૩॥

તથા વૃશ્ચિકરોમાણં નિર્જઘ્નુઃ ક્રમશોઽસુરાન્ ।
ચત્વારશ્ચતુરો હત્વા રાક્ષસાન્ ભીમવિક્રમાન્ ।
સિંહનાદં પૃથક્ કૃત્વા રામપાર્શ્વમુપાગતાઃ ॥ ૧૪॥

તતઃ ક્રુદ્ધો દશગ્રીવઃ સન્દશ્ય દશનચ્છદમ્ ॥ ૧૫॥

વિવૃત્ય નયને ક્રૂરો રામમેવાન્વધાવત ।
દશગ્રીવો રથસ્થસ્તુ રામં વજ્રોપમૈઃ શરૈઃ ॥ ૧૬॥

આજઘાન મહાઘોરૈર્ધારાભિરિવ તોયદઃ ।
રામસ્ય પુરતઃ સર્વાન્ વાનરાનપિ વિવ્યધે ॥ ૧૭॥

તતઃ પાવકસઙ્કાશૈઃ શરૈઃ કાઞ્ચનભૂષણૈઃ ।
અભ્યવર્ષદ્રણે રામો દશગ્રીવં સમાહિતઃ ॥ ૧૮॥

રથસ્થં રાવણં દૃષ્ટ્વા ભૂમિષ્ઠં રઘુનન્દનમ્ ।
આહૂય માતલિં શક્રો વચનં ચેદમબ્રવીત્ ॥ ૧૯॥

રથેન મમ ભૂમિષ્ઠં શીઘ્રં યાહિ રઘૂત્તમમ્ ।
ત્વરિતં ભૂતલં ગત્વા કુરુ કાર્યં મમાનઘ ॥ ૨૦॥

એવમુક્તોઽથ તં નત્વા માતલિર્દેવસારથિઃ ।
તતો હયૈશ્ચ સંયોજ્ય હરિતૈઃ સ્યન્દનોત્તમમ્ ॥ ૨૧॥

સ્વર્ગાજ્જયાર્થં રામસ્ય હ્યુપચક્રામ માતલિઃ ।
પ્રાઞ્જલિર્દેવરાજેન પ્રેષિતોઽસ્મિ રઘૂત્તમ ॥ ૨૨॥

રથોઽયં દેવરાજસ્ય વિજયાય તવ પ્રભો ।
પ્રેષિતશ્ચ મહારાજ ધનુરૈન્દ્રં ચ ભૂષિતમ્ ॥ ૨૩॥

અભેદ્યં કવચં ખડ્ગં દિવ્યતૂણીયુગં તથા ।
આરુહ્ય ચ રથં રામ રાવણં જહિ રાક્ષસમ્ ॥ ૨૪॥

મયા સારથિના દેવ વૃત્રં દેવપતિર્યથા ।
ઇત્યુક્તસ્તં પરિક્રમ્ય નમસ્કૃત્ય રથોત્તમમ્ ॥ ૨૫॥

આરુરોહ રથં રામો લોકાન્લ્લક્ષ્મ્યા નિયોજયન્ ।
તતોઽભવન્મહાયુદ્ધં ભૈરવં રોમહર્ષણમ્ ॥ ૨૬॥

મહાત્મનો રાઘવસ્ય રાવણસ્ય ચ ધીમતઃ ।
આગ્નેયેન ચ આગ્નેયં દૈવં દૈવેન રાઘવઃ ॥ ૨૭॥

અસ્ત્રં રાક્ષસરાજસ્ય જઘાન પરમાસ્ત્રવિત્ ।
તતસ્તુ સસૃજે ઘોરં રાક્ષસં ચાસ્ત્રમસ્ત્રવિત્ ।
ક્રોધેન મહતાવિષ્ટો રામસ્યોપરિ રાવણઃ ॥ ૨૮॥

રાવણસ્ય ધનુર્મુક્તાઃ સર્પા ભૂત્વા મહાવિષાઃ ।
શરાઃ કાઞ્ચનપુઙ્ખાભા રાઘવં પરિતોઽપતન્ ॥ ૨૯॥

તૈઃ શરૈઃ સર્પવદનૈર્વમદ્ભિરનલં મુખૈઃ ।
દિશશ્ચ વિદિશશ્ચૈવ વ્યાપ્તાસ્તત્ર તદાભવન્ ॥ ૩૦॥

રામઃ સર્પાંસ્તતો દૃષ્ટ્વા સમન્તાત્પરિપૂરિતાન્ ।
સૌપર્ણમસ્ત્રં તદ્ઘોરં પુરઃ પ્રાવર્તયદ્રણે ॥ ૩૧॥

રામેણ મુક્તાસ્તે બાણા ભૂત્વા ગરુડરૂપિણઃ ।
ચિચ્છિદુઃ સર્પબાણાંસ્તાન્ સમન્તાત્ સર્પશત્રવઃ ॥ ૩૨॥

અસ્ત્રે પ્રતિહતે યુદ્ધે રામેણ દશકન્ધરઃ ।
અભ્યવર્ષત્તતો રામં ઘોરાભિઃ શરવૃષ્ટિભિઃ ॥ ૩૩॥

તતઃ પુનઃ શરાનીકૈ રામમક્લિષ્ટકારિણમ્ ।
અર્દયિત્વા તુ ઘોરેણ માતલિં પ્રત્યવિધ્યત ॥ ૩૪॥

પાતયિત્વા રથોપસ્થે રથકેતું ચ કાઞ્ચનમ્ ।
ઐન્દ્રાનશ્વાનભ્યહનદ્રાવણઃ ક્રોધમૂર્ચ્છિતઃ ॥ ૩૫॥

વિષેદુર્દેવગન્ધર્વાશ્ચારણાઃ પિતરસ્તથા ।
આર્ત્તાકારં હરિં દૃષ્ટ્વા વ્યથિતાશ્ચ મહર્ષયઃ ॥ ૩૬॥

વ્યથિતા વાનરેન્દ્રાશ્ચ બભૂવુઃ સવિભીષણાઃ ।
દશાસ્યો વિંશતિભુજઃ પ્રગૃહીતશરાસનઃ ॥ ૩૭॥

દદૃશે રાવણસ્તત્ર મૈનાક ઇવ પર્વતઃ ।
રામસ્તુ ભ્રુકુટિં બદ્ધ્વા ક્રોધસંરક્તલોચનઃ ॥ ૩૮॥

કોપં ચકાર સદૃશં નિર્દહન્નિવ રાક્ષસમ્ ।
ધનુરાદાય દેવેન્દ્રધનુરાકારમદ્ભુતમ્ ॥ ૩૯॥

ગૃહીત્વા પાણિના બાણં કાલાનલસમપ્રભમ્ ।
નિર્દહન્નિવ ચક્ષુર્ભ્યાં દદૃશે રિપુમન્તિકે ॥ ૪૦॥

પરાક્રમં દર્શયિતું તેજસા પ્રજ્વલન્નિવ ।
પ્રચક્રમે કાલરૂપી સર્વલોકસ્ય પશ્યતઃ ॥ ૪૧॥

વિકૃષ્ય ચાપં રામસ્તુ રાવણં પ્રતિવિધ્ય ચ ।
હર્ષયન્ વાનરાનીકં કાલાન્તક ઇવાબભૌ ॥ ૪૩॥

ક્રુદ્ધં રામસ્ય વદનં દૃષ્ટ્વા શત્રું પ્રધાવતઃ ।
તત્રસુઃ સર્વભૂતાનિ ચચાલ ચ વસુન્ધરા ॥ ૪૩॥

રામં દૃષ્ટ્વા મહારૌદ્રમુત્પાતાંશ્ચ સુદારુણાન્ ।
ત્રસ્તાનિ સર્વભૂતાનિ રાવણં ચાવિશદ્ભયમ્ ॥ ૪૪॥

વિમાનસ્થા સુરગણાઃ સિદ્ધગન્ધર્વકિન્નરાઃ ।
દદૃશુઃ સુમહાયુદ્ધં લોકસંવર્તકોપમમ્ ।
ઐન્દ્રમસ્ત્રં સમાદાય રાવણસ્ય શિરોઽચ્છિનત્ ॥ ૪૫॥

મૂર્ધાનો રાવણસ્યાથ બહવો રુધિરોક્ષિતાઃ ।
ગગનાત્પ્રપતન્તિ સ્મ તાલાદિવ ફલાનિ હિ ॥ ૪૬॥

ન દિનં ન ચ વૈ રાત્રિર્ન સન્ધ્યાં ન દિશોઽપિ વા ।
પ્રકાશન્તે ન તદ્રૂપં દૃશ્યતે તત્ર સઙ્ગરે ॥ ૪૭॥

તતો રામો બભૂવાથ વિસ્મયાવિષ્ટમાનસઃ ।
શતમેકોત્તરં છિન્નં શિરસાં ચૈકવર્ચસામ્ ॥ ૪૮॥

ન ચૈવ રાવણઃ શાન્તો દૃશ્યતે જીવિતક્ષયાત્ ।
તતઃ સર્વાસ્ત્રવિદ્વીરઃ કૌસલ્યાનન્દવર્ધનઃ ॥ ૪૯॥

અસ્ત્રૈશ્ચ બહુભિર્યુક્તશ્ચિન્તયામાસ રાઘવઃ ।
યૈર્યૈર્બાણૈર્હતા દૈત્યા મહાસત્ત્વપરાક્રમાઃ ॥ ૫૦॥

ત એતે નિષ્ફલં યાતા રાવણસ્ય નિપાતને ।
ઇતિ ચિન્તાકુલે રામે સમીપસ્થો વિભીષણઃ ॥ ૫૧॥

ઉવાચ રાઘવં વાક્યં બ્રહ્મદત્તવરો હ્યસૌ ।
વિચ્છિન્ના બાહવોઽપ્યસ્ય વિચ્છિન્નાનિ શિરાંસિ ચ ॥ ૫૨॥

ઉત્પત્સ્યન્તિ પુનઃ શીઘ્રમિત્યાહ ભગવાનજઃ ।
નાભિદેશેઽમૃતં તસ્ય કુણ્ડલાકારસંસ્થિતમ્ ॥ ૫૩॥

તચ્છોષયાનલાસ્ત્રેણ તસ્ય મૃત્યુસ્તતો ભવેત્ ।

વિભીષણવચઃ શ્રુત્વા રામઃ શીઘ્રપરાક્રમઃ ॥ ૫૪॥

પાવકાસ્ત્રેણ સંયોજ્ય નાભિં વિવ્યાધ રક્ષસઃ ।
અનન્તરં ચ ચિચ્છેદ શિરાંસિ ચ મહાબલઃ ॥ ૫૫॥

બાહૂનપિ ચ સંરબ્ધો રાવણસ્ય રઘૂત્તમઃ ।
તતો ઘોરાં મહાશક્તિમાદાય દશકન્ધરઃ ॥ ૫૬॥

વિભીષણવધાર્થાય ચિક્ષેપ ક્રોધવિહ્વલઃ ।
ચિચ્છેદ રાઘવો બાણૈસ્તાં શિતૈર્હેમભૂષિતૈઃ ॥ ૫૭॥

દશગ્રીવશિરશ્છેદાત્તદા તેજો વિનિર્ગતમ્ ।
મ્લાનરૂપો બભૂવાથ છિન્નૈઃ શીર્ષૈર્ભયઙ્કરૈઃ ॥ ૫૮॥

એકેન મુખ્યશિરસા બાહુભ્યાં રાવણો બભૌ ।
રાવણસ્તુ પુનઃ ક્રુદ્ધો નાનાશસ્ત્રાસ્ત્રવૃષ્ટિભિઃ ॥ ૫૯॥

વવર્ષ રામં તં રામસ્તથા બાણૈર્વવર્ષ ચ ।
તતો યુદ્ધમભૂદ્ઘોરં તુમુલં લોમહર્ષણમ્ ॥ ૬૦॥

અથ સંસ્મારયામાસ માતલી રાઘવં તદા ।
વિસૃજાસ્ત્રં વધાયાસ્ય બ્રાહ્મં શીઘ્રં રઘૂત્તમ ॥ ૬૧॥

વિનાશકાલઃ પ્રથિતો યઃ સુરૈઃ સોઽદ્ય વર્તતે ।
ઉત્તમાઙ્ગં ન ચૈતસ્ય છેત્તવ્યં રાઘવ ત્વયા ॥ ૬૨॥

નૈવ શીર્ષ્ણિ પ્રભો વધ્યો વધ્ય એવ હિ મર્મણિ ।
તતઃ સંસ્મારિતો રામસ્તેન વાક્યેન માતલેઃ ॥ ૬૩॥

જગ્રાહ સ શરં દીપ્તં નિઃશ્વસન્તમિવોરગમ્ ।
યસ્ય પાર્શ્વે તુ પવનઃ ફલે ભાસ્કરપાવકૌ ॥ ૬૪॥

શરીરમાકાશમયં ગૌરવે મેરુમન્દરૌ ।
પર્વસ્વપિ ચ વિન્યસ્તા લોકપાલા મહૌજસઃ ॥ ૬૫॥

જાજ્વલ્યમાનં વપુષા ભાતં ભાસ્કરવર્ચસા ।
તમુગ્રમસ્ત્રં લોકાનાં ભયનાશનમદ્ભુતમ્ ॥ ૬૬॥

અભિમન્ત્ર્ય તતો રામસ્તં મહેષું મહાભુજઃ ।
વેદપ્રોક્તેન વિધિના સન્દધે કાર્મુકે બલી ॥ ૬૭॥

તસ્મિન્ સન્ધીયમાને તુ રાઘવેણ શરોત્તમે ।
સર્વભૂતાનિ વિત્રેસુશ્ચચાલ ચ વસુન્ધરા ॥ ૬૮॥

સ રાવણાય સઙ્ક્રુદ્ધો ભૃશમાનમ્ય કાર્મુકમ્ ।
ચિક્ષેપ પરમાયત્તસ્તમસ્ત્રં મર્મઘાતિનમ્ ॥ ૬૯॥

સ વજ્ર ઇવ દુર્ધર્ષો વજ્રપાણિવિસર્જિતઃ ।
કૃતાન્ત ઇવ ઘોરાસ્યો ન્યપતદ્રાવણોરસિ ॥ ૭૦॥

સ નિમગ્નો મહાઘોરઃ શરીરાન્તકરઃ પરઃ ।
બિભેદ હૃદયં તૂર્ણં રાવણસ્ય મહાત્મનઃ ॥ ૭૧॥

રાવણસ્યાહરત્પ્રાણાન્ વિવેશ ધરણિતલે ।
સ શરો રાવણં હત્વા રામતૂણીરમાવિશત્ ॥ ૭૨॥

તસ્ય હસ્તાત્પપાતાશુ સશરં કાર્મુકં મહત્ ।
ગતાસુર્ભ્રમિવેગેન રાક્ષસેન્દ્રોઽપતદ્ભુવિ ॥ ૭૩॥

તં દૃષ્ટ્વા પતિતં ભૂમૌ હતશેષાશ્ચ રાક્ષસાઃ ।
હતનાથા ભયત્રસ્તા દુદ્રુવુઃ સર્વતોદિશમ્ ॥ ૭૪॥

દશગ્રીવસ્ય નિધનં વિજયં રાઘવસ્ય ચ ।
તતો વિનેદુઃ સંહૃષ્ટા વાનરા જિતકાશિનઃ ॥ ૭૫॥

વદન્તો રામવિજયં રાવણસ્ય ચ તદ્વધમ્ ।
અથાન્તરિક્ષે વ્યનદત્સૌમ્યસ્ત્રિદશદુન્દુભિઃ ॥ ૭૬॥

પપાત પુષ્પવૃષ્ટિશ્ચ સમન્તાદ્રાઘવોપરિ ।
તુષ્ટુવુર્મુનયઃ સિદ્ધાશ્ચારણાશ્ચ દિવૌકસઃ ॥ ૭૭॥

અથાન્તરિક્ષે નનૃતુઃ સર્વતોઽપ્સરસો મુદા ।
રાવણસ્ય ચ દેહોત્થં જ્યોતિરાદિત્યવત્સ્ફુરત્ ॥ ૭૮॥

પ્રવિવેશ રઘુશ્રેષ્ઠં દેવાનાં પશ્યતાં સતામ્ ।
દેવા ઊચુરહો ભાગ્યં રાવણસ્ય મહાત્મનઃ ॥ ૭૯॥

વયં તુ સાત્ત્વિકા દેવા વિષ્ણોઃ કારુણ્યભાજનાઃ ।
ભયદુઃખાદિભિર્વ્યાપ્તાઃ સંસારે પરિવર્તિનઃ ॥ ૮૦॥

અયં તુ રાક્ષસઃ ક્રૂરો બ્રહ્મહાઽતીવ તામસઃ ।
પરદારરતો વિષ્ણુદ્વેષી તાપસહિંસકઃ ॥ ૮૧॥

પશ્યત્સુ સર્વભૂતેષુ રામમેવ પ્રવિષ્ટવાન્ ।
એવં બ્રુવત્સુ દેવેષુ નારદઃ પ્રાહ સુસ્મિતઃ ॥ ૮૨॥

શ્ૃણુતાત્ર સુરા યૂયં ધર્મતત્ત્વવિચક્ષણાઃ ।
રાવણો રાઘવદ્વેષાદનિશં હૃદિ ભાવયન્ ॥ ૮૩॥

ભૃત્યૈઃ સહ સદા રામચરિતં દ્વેષસંયુતઃ ।
શ્રુત્વા રામાત્સ્વનિધનં ભયાત્સર્વત્ર રાઘવમ્ ॥ ૮૪॥

પશ્યન્નનુદિનં સ્વપ્ને રામમેવાનુપશ્યતિ ।
ક્રોધોઽપિ રાવણસ્યાશુ ગુરુબોધાધિકોઽભવત્ ॥ ૮૫॥

રામેણ નિહતશ્ચાન્તે નિર્ધૂતાશેષકલ્મષઃ ।
રામસાયુજ્યમેવાપ રાવણો મુક્તબન્ધનઃ ॥ ૮૬॥

પાપિષ્ઠો વા દુરાત્મા પરધનપરદારેષુ સક્તો યદિ સ્યા-
ન્નિત્યં સ્નેહાદ્ભયાદ્વા રઘુકુલતિલકં ભાવયન્ સમ્પરેતઃ ।
ભૂત્વા શુદ્ધાન્તરઙ્ગો ભવશતજનિતાનેકદોષૈર્વિમુક્તઃ
સદ્યો રામસ્ય વિષ્ણોઃ સુરવરવિનુતં યાતિ વૈકુણ્ઠમાદ્યમ્ ॥ ૮૭॥

હત્વા યુદ્ધે દશાસ્યં ત્રિભુવનવિષમં વામહસ્તેન ચાપં
ભુમૌ વિષ્ટભ્ય તિષ્ઠન્નિતરકરધૃતં ભ્રામયન્ બાણમેકમ્ ।
આરક્તોપાન્તનેત્રઃ શરદલિતવપુઃ સૂર્યકોટિપ્રકાશો
વીરશ્રીબન્ધુરાઙ્ગસ્ત્રિદશપતિનુતઃ પાતુ માં વીરરામઃ ॥ ૮૮॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે યુદ્ધકાણ્ડે
એકાદશઃ સર્ગઃ ॥ ૧૧॥

## ॥ દ્વાદશઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
રામો વિભીષણં દૃષ્ટ્વા હનૂમન્તં તથાઙ્ગદમ્ ।
લક્ષ્મણં કપિરાજં ચ જામ્બવન્તં તથા પરાન્ ॥ ૧॥

પરિતુષ્ટેન મનસા સર્વાનેવાબ્રવીદ્વચઃ ।

ભવતાં બાહુવીર્યેણ નિહતો રાવણો મયા ॥ ૨॥

કીર્તિઃ સ્થાસ્યતિ વઃ પુણ્યા યાવચ્ચન્દ્રદિવાકરૌ
કીર્તયિષ્યન્તિ ભવતાં કથાં ત્રૈલોક્યપાવનીમ્ ॥ ૩॥

મયોપેતાં કલિહરાં યાસ્યન્તિ પરમાં ગતિમ્ ।
એતસ્મિન્નન્તરે દૃષ્ટ્વા રાવણં પતિતં ભુવિ ॥ ૪॥

મન્દોદરીમુખાઃ સર્વાઃ સ્ત્રિયો રાવણપાલિતાઃ ।
પતિતા રાવણસ્યાગ્રે શોચન્ત્યઃ પર્યદેવયન્ ॥ ૫॥

વિભીષણઃ શુશોચાર્તઃ શોકેન મહતાવૃતઃ ।
પતિતો રાવણસ્યાગ્રે બહુધા પર્યદેવયત્ ॥ ૬॥

રામસ્તુ લક્ષ્મણં પ્રાહ બોધયસ્વ વિભીષણમ્ ।
કરોતુ ભ્રાતૃસંસ્કારં કિં વિલમ્બેન માનદ ॥ ૭॥

સ્ત્રિયો મન્દોદરીમુખ્યાઃ પતિતા વિલપન્તિ ચ ।
નિવારયતુ તાઃ સર્વા રાક્ષસી રાવણપ્રિયાઃ ॥ ૮॥

એવમુક્તોઽથ રામેણ લક્ષ્મણોઽગાદ્વિભીષણમ્ ।
ઉવાચ મૃતકોપાન્તે પતિતં મૃતકોપમમ્ ॥ ૯॥

શોકેન મહતાવિષ્ટં  સૌમિત્રિરિદમબ્રવીત્ ।
યં શોચસિ ત્વં દુઃખેન કોઽયં તવ વિભીષણ ॥ ૧૦॥

ત્વં વાસ્ય કતમઃ સૃષ્ટેઃ પુરેદાનીમતઃ પરમ્ ।
યદ્વત્તોયૌઘપતિતાઃ સિકતા યાન્તિ તદ્વશાઃ ॥ ૧૧॥

સંયુજ્યન્તે વિયુજ્યન્તે તથા કાલેન દેહિનઃ ।
યથા ધાનાસુ વૈ ધાના ભવન્તિ ન ભવન્તિ ચ ॥ ૧૨॥

એવં ભૂતેષુ ભૂતાનિ પ્રેરિતાનીશમાયયા ।
ત્વં ચેમે વયમન્યે ચ તુલ્યાઃ કાલવશોદ્ભવાઃ ॥ ૧૩॥

જન્મમૃત્યૂ યદા યસ્માત્તદા તસ્માદ્ભવિષ્યતઃ ।
ઈશ્વરઃ સર્વભૂતાનિ ભૂતૈઃ સૃજતિ હન્ત્યજઃ ॥ ૧૪॥

આત્મસૃષ્ટૈરસ્વતન્ત્રૈર્નિરપેક્ષોઽપિ બાલવત્ ।
દેહેન દેહિનો જીવા દેહાદ્દેહોઽભિજાયતે ॥ ૧૫॥

બીજાદેવ યથા બીજં દેહાન્ચ ઇવ શાશ્વતઃ ।
દેહિદેહવિભાગોઽયમવિવેકકૃતઃ પુરા ॥ ૧૬॥

નાનાત્વં જન્મ નાશશ્ચ ક્ષયો વૃદ્ધિઃ ક્રિયાફલમ્ ।
દ્રષ્ટુરાભાન્ત્યતદ્ધર્મા યથાગ્નેર્દારુવિક્રિયાઃ ॥ ૧૭॥

ત ઇમે દેહસંયોગાદાત્મના ભાન્ત્યસદ્ગ્રહાત્ ।
યથા યથા તથા ચાન્યદ્ધ્યાયતોઽસત્સદાગ્રહાત્ ॥ ૧૮॥

પ્રસુપ્તસ્યાનહમ્ભાવાત્તદા ભાતિ ન સંસૃતિઃ ।
જીવતોઽપિ તથા તદ્વદ્વિમુક્તસ્યાનહઙ્કૃતેઃ ॥ ૧૯॥

તસ્માન્માયામનોધર્મં જહ્યહમ્મમતાભ્રમમ્ ।
રામભદ્રે ભગવતિ મનો ધેહ્યાત્મનીશ્વરે ॥ ૨૦॥

સર્વભૂતાત્મનિ પરે માયામાનુષરૂપિણિ ।
બાહ્યેન્દ્રિયાર્થસમ્બન્ધાત્ત્યાજયિત્વા મનઃ શનૈઃ ॥ ૨૧॥

તત્ર દોષાન્ દર્શયિત્વા રામાનન્દે નિયોજય ।
દેહબુદ્ધ્યા ભવેદ્ભ્રાતા પિતા માતા સુહૃત્પ્રિયઃ ॥ ૨૨॥

વિલક્ષણં યદા દેહાજ્જાનાત્યાત્માનમાત્મના ।
તદા કઃ કસ્ય વા બન્ધુર્ભ્રાતા માતા પિતા સુહૃત્ ॥ ૨૩॥

મિથ્યાજ્ઞાનવશાજ્જાતા દારાગારાદયઃ સદા ।
શબ્દાદયશ્ચ વિષયા વિવિધાશ્ચૈવ સમ્પદઃ ॥ ૨૪॥

બલં કોશો ભૃત્યવર્ગો રાજ્યં ભૂમિઃ સુતાદયઃ ।
અજ્ઞાનજત્વાત્સર્વે તે ક્ષણસઙ્ગમભઙ્ગુરાઃ ॥ ૨૫॥

અથોત્તિષ્ઠ હૃદા રામં ભાવયન્ ભક્તિભાવિતમ્ ।
અનુવર્તસ્વ રાજ્યાદિ ભુઞ્જન્ પ્રારબ્ધમન્વહમ્ ॥ ૨૬॥

ભૂતં ભવિષ્યદભજન્ વર્તમાનમથાચરન્ ।
વિહરસ્વ યથાન્યાયં ભવદોષૈર્ન લિપ્યસે ॥ ૨૭॥

આજ્ઞાપયતિ રામસ્ત્વાં યદ્ભ્રાતુઃ સામ્પરાયિકમ્ ।
તત્કુરુષ્વ યથાશાસ્ત્રં રુદતીશ્ચાપિ યોષિતઃ ॥ ૨૮॥

નિવારય મહાબુદ્ધે લઙ્કાં ગચ્છન્તુ મા ચિરમ્ ।
શ્રુત્વા યથાવદ્વચનં લક્ષ્મણસ્ય વિભીષણઃ ॥ ૨૯॥

ત્યક્ત્વા શોકં ચ મોહં ચ રામપાર્શ્વમુપાગમત્ ।
વિમૃશ્ય બુદ્ધ્યા ધર્મજ્ઞો ધર્માર્થસહિતં વચઃ ॥ ૩૦॥

રામસ્યૈવાનુવૃત્ત્યર્થમુત્તરં પર્યભાષત ।
નૃશંસમનૃતં ક્રૂરં ત્યક્તધર્મવ્રતં પ્રભો ॥ ૩૧॥

નાર્હોઽસ્મિ દેવ સંસ્કર્તું પરદારાભિમર્શિનમ્ ।
શ્રુત્વા તદ્વચનં પ્રીતો રામો વચનમબ્રવીત્ ॥ ૩૨॥

મરણાન્તાનિ વૈરાણિ નિવૃત્તં નઃ પ્રયોજનમ્ ।
ક્રિયતામસ્ય સંસ્કારો મમાપ્યેષ યથા તવ ॥ ૩૩॥

રામાજ્ઞાં શિરસા ધૃત્વા શીઘ્રમેવ વિભીષણઃ ।
સાન્ત્વવાક્યૈર્મહાબુદ્ધિં રાજ્ઞીં મન્દોદરીં તદા ॥ ૩૪॥

સાન્ત્વયામાસ ધર્માત્મા ધર્મબુદ્ધિર્વિભીષણઃ ।
ત્વરયામાસ ધર્મજ્ઞઃ સંસ્કારાર્થં સ્વબાન્ધવાન્ ॥ ૩૫॥

ચિત્યાં નિવેશ્ય વિધિવત્પિતૃમેધવિધાનતઃ ।
આહિતાગ્નેર્યથા કાર્યં રાવણસ્ય વિભીષણઃ ॥ ૩૬॥

તથૈવ સર્વમકરોદ્બન્ધુભિઃ સહ મન્ત્રિભિઃ ।
દદૌ ચ પાવકં તસ્ય વિધિયુક્તં વિભીષણઃ ॥ ૩૭॥

સ્નાત્વા ચૈવાર્દ્રવસ્ત્રેણ તિલાન્ દર્ભાભિમિશ્રિતાન્ ।
ઉદકેન ચ સમ્મિશ્રાન્ પ્રદાય વિધિપૂર્વકમ્ ॥ ૩૮॥

પ્રદાય ચોદકં તસ્મૈ મુર્ધ્ના ચૈનં પ્રણમ્ય ચ ।
તાઃ સ્ત્રિયોઽનુનયામાસ સાન્ત્વમુક્ત્વા પુનઃ પુનઃ ॥ ૩૯॥

ગમ્યતામિતિ તાઃ સર્વા વિવિશુર્નગરં તદા ।
પ્રવિષ્ટાસુ ચ સર્વાસુ રાક્ષસીષુ વિભીષણઃ ॥ ૪૦॥

રામપાર્શ્વમુપાગત્ય તદાતિષ્ઠદ્વિનીતવત્ ।
રામોઽપિ સહ સૈન્યેન સસુગ્રીવઃ સલક્ષ્મણઃ ॥ ૪૧॥

હર્ષં લેભે રિપૂન્ હત્વા યથા વૃત્રં શતક્રતુઃ ।
માતલિશ્ચ તદા રામં પરિક્રમ્યાભિવન્દ્ય ચ ॥ ૪૨॥

અનુજ્ઞાતશ્ચ રામેણ યયૌ સ્વર્ગં વિહાયસા ।

તતો હૃષ્ટમના રામો લક્ષ્મણં ચેદમબ્રવીત્ ॥ ૪૩॥

વિભીષણાય મે લઙ્કારાજ્યં દત્તં પુરૈવ હિ ।
ઇદાનીમપિ ગત્વા ત્વં લઙ્કામધ્યે વિભીષણમ્ ॥ ૪૪॥

અભિષેચય વિપ્રૈશ્ચ મન્ત્રવદ્વિધિપૂર્વકમ્ ।
ઇત્યુક્તો લક્ષ્મણસ્તૂર્ણં જગામ સહ વાનરૈઃ ॥ ૪૫॥

લઙ્કાં સુવર્ણકલશૈઃ સમુદ્રજલસંયુતૈઃ ।
અભિષેકં શુભં ચક્રે રાક્ષસેન્દ્રસ્ય ધીમતઃ ॥ ૪૬॥

તતઃ પૌરજનૈઃ સાર્ધં નાનોપાયનપાણિભિઃ ।
વિભીષણઃ સસૌમિત્રિરુપાયનપુરસ્કૃતઃ ॥ ૪૭॥

દણ્ડપ્રણામમકરોદ્રામસ્યાક્લિષ્ટકર્મણઃ ।
રામો વિભીષણં દૃષ્ટ્વા પ્રાપ્તરાજ્યં મુદાન્વિતઃ ॥ ૪૮॥

કૃતકૃત્યમિવાત્માનમમન્યત સહાનુજઃ ।
સુગ્રીવં ચ સમાલિઙ્ગ્ય રામો વાક્યમથાબ્રવીત્ ॥ ૪૯॥

સહાયેન ત્વયા વીર જિતો મે રાવણો મહાન્ ।
વિભીષણોઽપિ લઙ્કાયામભિષિક્તો મયાનઘ ॥ ૫૦॥

તતઃ પ્રાહ હનૂમન્તં પાર્શ્વસ્થં વિનયાન્વિતમ્ ।
વિભીષણસ્યાનુમતેર્ગચ્છ ત્વં રાવણાલયમ્ ॥ ૫૧॥

જાનક્યૈ સર્વમાખ્યાહિ રાવણસ્ય વધાદિકમ્ ।
જાનક્યાઃ પ્રતિવાક્યં મે શીઘ્રમેવ નિવેદય ॥ ૫૨॥

એવમાજ્ઞાપિતો ધીમાન્ રામેણ પવનાત્મજઃ ।
પ્રવિવેશ પુરીં લઙ્કાં પૂજ્યમાનો નિશાચરૈઃ ॥ ૫૩॥

પ્રવિશ્ય રાવણગૃહં શિંશપામૂલમાશ્રિતામ્ ।
દદર્શ જાનકીં તત્ર કૃશાં દીનામનિન્દિતામ્ ॥ ૫૪॥

રાક્ષસીભિઃ પરિવૃતાં ધ્યાયન્તીં રામમેવ હિ ।
વિનયાવનતો ભૂત્વા પ્રણમ્ય પવનાત્મજઃ ॥ ૫૫॥

કૃતાઞ્જલિપુટો ભૂત્વા પ્રહ્વો ભક્ત્યાઽગ્રતઃ સ્થિતઃ ।
તં દૃષ્ટ્વા જાનકી તૂષ્ણીં સ્થિત્વા પૂર્વસ્મૃતિં યયૌ ॥ ૫૬॥

જ્ઞાત્વા તં રામદૂતં સા હર્ષાત્સૌમ્યમુખી બભૌ ।
સ તાં સૌમ્યમુખીં દૃષ્ટ્વા તસ્યૈ પવનનન્દનઃ ।
રામસ્ય ભાષિતં સર્વમાખ્યાતુમુપચક્રમે ॥ ૫૭॥

દેવિ રામઃ સસુગ્રીવો વિભીષણસહાયવાન્ ।
કુશલી વાનરાણાં ચ સૈન્યૈશ્ચ સહલક્ષ્મણઃ ॥ ૫૮॥

રાવણં સસુતં હત્વા સબલં સહ મન્ત્રિભિઃ ।
ત્વામાહ કુશલં રામો રાજ્યે કૃત્વા વિભીષણમ્ ॥ ૫૯॥

શ્રુત્વા ભર્તુઃ પ્રિયં વાક્યં હર્ષગદ્ગદયા ગિરા ।
કિં તે પ્રિયં કરોમ્યદ્ય ન પશ્યામિ જગત્ત્રયે ॥ ૬૦॥

સમં તે પ્રિયવાક્યસ્ય રત્નાન્યાભરણાનિ ચ ।
એવમુક્તસ્તુ વૈદેહ્યા પ્રત્યુવાચ પ્લવઙ્ગમઃ ॥ ૬૧॥

રત્નૌઘાદ્વિવિધાદ્વાપિ દેવરાજ્યાદ્વિશિષ્યતે ।
હતશત્રું વિજયિનં રામં પશ્યામિ સુસ્થિરમ્ ॥ ૬૨॥

તસ્ય તદ્વચનં શ્રુત્વા મૈથિલી પ્રાહ મારુતિમ્ ।
સર્વે સૌમ્યા ગુણા સૌમ્ય ત્વય્યેવ પરિનિષ્ઠિતાઃ ॥ ૬૩॥

રામં દ્રક્ષ્યામિ શીઘ્રં મામાજ્ઞાપયતુ રાઘવઃ ।
તથેતિ તાં નમસ્કૃત્ય યયૌ દ્રષ્ટું રઘૂત્તમમ્ ॥ ૬૪॥

જાનક્યા ભાષિતં સર્વં રામસ્યાગ્રે ન્યવેદયત્ ।
યન્નિમિત્તોઽયમારમ્ભઃ કર્મણાં ચ ફલોદયઃ ॥ ૬૫॥

તાં દેવીં શોકસન્તપ્તાં દ્રષ્ટુમર્હસિ મૈથિલીમ્ ।
એવમુક્તો હનુમતા રામો જ્ઞાનવતાં વરઃ ॥ ૬૬॥

માયાસીતાં પરિત્યક્તું જાનકીમનલે સ્થિતામ્ ।
આદાતું મનસા ધ્યાત્વા રામઃ પ્રાહ વિભીષણમ્ ॥ ૬૭॥

ગચ્છ રાજન્ જનકજામાનયાશુ મમાન્તિકમ્ ।
સ્નાતાં વિરજવસ્ત્રાઢ્યાં સર્વાભરણભૂષિતામ્ ॥ ૬૮॥

વિભીષણોઽપિ તચ્છ્રુત્વા જગામ સહમારુતિઃ ।
રાક્ષસીભિઃ સુવૃદ્ધાભિઃ સ્નાપયિત્વા તુ મૈથિલીમ્ ॥ ૬૯॥

સર્વાભરણસમ્પન્નામારોપ્ય શિબિકોત્તમે ।

યાષ્ટીકૈર્બહુભિર્ગુમાં કઞ્ચુકોષ્ણીષિભિઃ શુભામ્ ॥ ૭૦॥

તાં દ્રષ્ટુમાગતાઃ સર્વે વાનરા જનકાત્મજામ્ ।
તાન્ વારયન્તો બહવઃ સર્વતો વેત્રપાણયઃ ॥ ૭૧॥

કોલાહલં પ્રકુર્વન્તો રામપાર્શ્વમુપાયયુઃ ।
દૃષ્ટ્વા તાં શિબિકારૂઢાં દૂરાદથ રઘૂત્તમઃ ॥ ૭૨॥

વિભીષણ કિમર્થં તે વાનરાન્ વારયન્તિ હિ ।
પશ્યન્તુ વાનરાઃ સર્વે મૈથિલીં માતરં યથા ॥ ૭૩॥

પાદચારેણ સાઽઽયાતુ જાનકી મમ સન્નિધિમ્ ।
શ્રુત્વા તદ્રામવચનં શિબિકાદવરુહ્ય સા ॥ ૭૪॥

પાદચારેણ શનકૈરાગતા રામસન્નિધિમ્ ।
રામોઽપિ દૃષ્ટ્વા તાં માયાસીતાં કાર્યાર્થનિર્મિતામ્ ॥ ૭૫॥

અવાચ્યવાદાન્ બહુશઃ પ્રાહ તાં રઘુનન્દનઃ ।
અમૃષ્યમાણા સા સીતા વચનં રાઘવોદિતમ્ ॥ ૭૬॥

લક્ષ્મણં પ્રાહ મે શીઘ્રં પ્રજ્વાલય હુતાશનમ્ ।
વિશ્વાસાર્થં હિ રામસ્ય લોકાનાં પ્રત્યયાય ચ ॥ ૭૭॥

રાઘવસ્ય મતં જ્ઞાત્વા લક્ષ્મણોઽપિ તદૈવ હિ ।
મહાકાષ્ઠચયં કૃત્વા જ્વાલયિત્વા હુતાશનમ્ ॥ ૭૮॥

રામપાર્શ્વમુપાગમ્ય તસ્થૌ તૂષ્ણીમરિન્દમઃ ।
તતઃ સીતા પરિક્રમ્ય રાઘવં ભક્તિસંયુતા ॥ ૭૯॥

પશ્યતાં સર્વલોકાનાં દેવરાક્ષસયોષિતામ્ ।
પ્રણમ્ય દેવતાભ્યશ્ચ બ્રાહ્મણેભ્યશ્ચ મૈથિલી ॥ ૮૦॥

બદ્ધાઞ્જલિપુટા ચેદમુવાચાગ્નિસમીપગા ।
યથા મે હૃદયં નિત્યં નાપસર્પતિ રાઘવાત્ ॥ ૮૧॥

તથા લોકસ્ય સાક્ષી માં સર્વતઃ પાતુ પાવકઃ ।
એવમુક્ત્વા તદા સીતા પરિક્રમ્ય હુતાશનમ્ ॥ ૮૨॥

વિવેશ જ્વલનં દીપ્તં નિર્ભયેન હૃદા સતી ॥ ૮૩॥

દૃષ્ટ્વા તતો ભૂતગણાઃ સસિદ્ધાઃ

સીતાં મહાવહ્નિગતાં ભૃશાર્તાઃ ।
પરસ્પરં પ્રાહુરહો સ સીતાં
રામઃ શ્રિયં સ્વાં કથમત્યજજ્જ્ઞઃ ॥ ૮૪॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે યુદ્ધકાણ્ડે
દ્વાદશઃ સર્ગઃ ॥ ૧૨॥

## ॥ ત્રયોદશઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
તતઃ શક્રઃ સહસ્રાક્ષો યમશ્ચ વરુણસ્તથા ।
કુબેરશ્ચ મહાતેજાઃ પિનાકી વૃષવાહનઃ ॥ ૧॥

બ્રહ્મા બ્રહ્મવિદાં શ્રેષ્ઠો મુનિભિઃ સિદ્ધચારણૈઃ ।
ઋષયઃ પિતરઃ સાધ્યા ગન્ધર્વાપ્સરસોરગાઃ ॥ ૨॥

એતે ચાન્યે વિમાનાગ્ર્યૈરાજગ્મુર્યત્ર રાઘવઃ ।
અબ્રુવન્ પરમાત્માનં રામં પ્રાઞ્જલયશ્ચ તે ॥ ૩॥

કર્તા ત્વં સર્વલોકાનાં સાક્ષી વિજ્ઞાનવિગ્રહઃ ।
વસૂનામષ્ટમોઽસિ ત્વં રુદ્રાણાં શઙ્કરો ભવાન્ ॥ ૪॥

આદિકર્તાસિ લોકાનાં બ્રહ્મા ત્વં ચતુરાનનઃ ।
અશ્વિનૌ ઘ્રાણભૂતૌ તે ચક્ષુષી ચન્દ્રભાસ્કરૌ ॥ ૫॥

લોકાનામાદિરન્તોઽસિ નિત્ય એકઃ સદોદિતઃ ।
સદા શુદ્ધઃ સદા બુદ્ધઃ સદા મુક્તોઽગુણોઽદ્વયઃ ॥ ૬॥

ત્વન્માયાસંવૃતાનાં ત્વં ભાસિ માનુષવિગ્રહઃ ।
ત્વન્નામ સ્મરતાં રામ સદા ભાસિ ચિદાત્મકઃ ॥ ૭॥

રાવણેન હૃતં સ્થાનમસ્માકં તેજસા સહ ।
ત્વયાદ્ય નિહતો દુષ્ટઃ પુનઃ પ્રાપ્તં પદં સ્વકમ્ ॥ ૮॥

એવં સ્તુવત્સુ દેવેષુ બ્રહ્મા સાક્ષાત્પિતામહઃ ।
અબ્રવીત્પ્રણતો ભૂત્વા રામં સત્યપથે સ્થિતમ્ ॥ ૯॥

બ્રહ્મોવાચ

વન્દે દેવં વિષ્ણુમશેષસ્થિતિહેતું
        ત્વામધ્યાત્મજ્ઞાનિભિરન્તર્હૃદિ ભાવ્યમ્ ।
હેયાહેયદ્વન્દ્વવિહીનં પરમેકં
        સત્તામાત્રં સર્વહૃદિસ્થં દૃશિરૂપમ્ ॥ ૧૦॥

પ્રાણાપાનૌ નિશ્ચયબુદ્ધ્યા હૃદિ રુદ્ધ્વા
        છિત્વા સર્વં સંશયબન્ધં વિષયૌઘાન્ ।
પશ્યન્તીશં યં ગતમોહા યતયસ્તં
        વન્દે રામં રત્નકિરીટં રવિભાસમ્ ॥ ૧૧॥

માયાતીતં માધવમાદ્યં જગદાદિં
        માનાતીતં મોહવિનાશં મુનિવન્દ્યમ્ ।
યોગિધ્યેયં યોગવિધાનં પરિપૂર્ણં
        વન્દે રામં રઞ્જિતલોકં રમણીયમ્ ॥ ૧૨॥

ભાવાભાવપ્રત્યયહીનં ભવમુખ્યૈઃ
        યોગાસક્તૈરર્ચિતપાદામ્બુજયુગ્મમ્ ।
નિત્યં શુદ્ધં બુદ્ધમનન્તં પ્રણવાખ્યં
        વન્દે રામં વીરમશેષાસુરદાવમ્ ॥ ૧૩॥

ત્વં મે નાથો નાથિતકાર્યાખિલકારી
        માનાતીતો માધવરૂપોઽખિલધારી ।
ભક્ત્યા ગમ્યો ભાવિતરૂપો ભવહારી
        યોગાભ્યાસૈર્ભાવિતચેતઃસહચારી ॥ ૧૪॥

ત્વામાદ્યન્તં લોકતતીનાં પરમીશં
        લોકાનાં નો લૌકિકમાનૈરધિગમ્યમ્ ।
ભક્તિશ્રદ્ધાભાવસમેતૈર્ભજનીયં
        વન્દે રામં સુન્દરમિન્દીવરનીલમ્ ॥ ૧૫॥

કો વા જ્ઞાતું ત્વામતિમાનં ગતમાનં
        માયાસક્તો માધવ શક્તો મુનિમાન્યમ્ ।
વૃન્દારણ્યે વન્દિતવૃન્દારકવૃન્દં
        વન્દે રામં ભવમુખવન્દ્યં સુખકન્દમ્ ॥ ૧૬॥

નાનાશાસ્ત્રૈર્વેદકદમ્બૈઃ પ્રતિપાદ્યં
        નિત્યાનન્દં નિર્વિષયજ્ઞાનમનાદિમ્ ।

મત્સેવાર્થં માનુષભાવં પ્રતિપન્નં
વન્દે રામં મરકતવર્ણં મથુરેશમ્ ॥ ૧૭॥

શ્રદ્ધાયુક્તો યઃ પઠતીમં સ્તવમાદ્યં
બ્રાહ્મં બ્રહ્મજ્ઞાનવિધાનં ભુવિ મર્ત્યઃ ।
રામં શ્યામં કામિતકામપ્રદમીશં
ધ્યાત્વા ધ્યાતા પાતકજાલૈર્વિગતઃ સ્યાત્ ॥ ૧૮॥

શ્રુત્વા સ્તુતિં લોકગુરોર્વિભાવસુઃ
સ્વાઙ્કે સમાદાય વિદેહપુત્રિકામ્ ।
વિભ્રાજમાનાં વિમલારુણદ્યુતિં
રક્તામ્બરાં દિવ્યવિભૂષણાન્વિતામ્ ॥ ૧૯॥

પ્રોવાચ સાક્ષી જગતાં રઘૂત્તમં
પ્રપન્નસર્વાર્તિહરં હુતાશનઃ ।
ગૃહાણ દેવીં રઘુનાથ જાનકીં
પુરા ત્વયા મય્યવરોપિતાં વને ॥ ૨૦॥

વિધાય માયાજનકાત્મજાં હરે
દશાનનપ્રાણવિનાશનાય ચ ।
હતો દશાસ્યઃ સહ પુત્રબાન્ધવૈ-
ર્નિરાકૃતોઽનેન ભરો ભુવઃ પ્રભો ॥ ૨૧॥

તિરોહિતા સા પ્રતિબિમ્બરૂપિણી
કૃતા યદર્થં કૃતકૃત્યતાં ગતા ।
તતોઽતિહૃષ્ટાં પરિગૃહ્ય જાનકીં
રામઃ પ્રહૃષ્ટઃ પ્રતિપૂજ્ય પાવકમ્ ॥ ૨૨॥

સ્વાઙ્કે સમાવેશ્ય સદાઽનપાયિનીં
શ્રિયં ત્રિલોકીજનનીં શ્રિયઃ પતિઃ ।
દૃષ્ટ્વાથ રામં જનકાત્મજાયુતં
શ્રિયા સ્ફુરન્તં સુરનાયકો મુદા ।
ભક્ત્યા ગિરા ગદ્ગદયા સમેત્ય
કૃતાઞ્જલિઃ સ્તોતુમથોપચક્રમે ॥ ૨૩॥

ઇન્દ્ર ઉવાચ ।
ભજેઽહં સદા રામમિન્દીવરાભં

ભવારણ્યદાવાનલાભાભિધાનમ્ ।
ભવાનીહૃદા ભાવિતાનન્દરૂપં
ભવાભાવહેતું ભવાદિપ્રપન્નમ્ ॥ ૨૪॥

સુરાનીકદુઃખૌઘનાશૈકહેતું
નરાકારદેહં નિરાકારમીડ્યમ્ ।
પરેશં પરાનન્દરૂપં વરેણ્યં
હરિં રામમીશં ભજે ભારનાશમ્ ॥ ૨૫॥

પ્રપન્નાખિલાનન્દદોહં પ્રપન્નં
પ્રપન્નાર્તિનિઃશેષનાશાભિધાનમ્ ।
તપોયોગયોગીશભાવાભિભાવ્યં
કપીશાદિમિત્રં ભજે રામમિત્રમ્ ॥ ૨૬॥

સદા ભોગભાજાં સુદૂરે વિભાન્તં
સદા યોગભાજામદૂરે વિભાન્તમ્ ।
ચિદાનન્દકન્દં સદા રાઘવેશં
વિદેહાત્મજાનન્દરૂપં પ્રપદ્યે ॥ ૨૭॥

મહાયોગમાયાવિશેષાનુયુક્તો
વિભાસીશ લીલાનરાકારવૃત્તિઃ ।
ત્વદાનન્દલીલાકથાપૂર્ણકર્ણાઃ
સદાનન્દરૂપા ભવન્તીહ લોકે ॥ ૨૮॥

અહં માનપાનાભિમત્તપ્રમત્તો
ન વેદાખિલેશાભિમાનાભિમાનઃ ।
ઇદાનીં ભવત્પાદપદ્મપ્રસાદાત્
ત્રિલોકાધિપત્યાભિમાનો વિનષ્ટઃ ॥ ૨૯॥

સ્ફુરદ્રત્નકેયૂરહારાભિરામં
ધરાભારભૂતાસુરાનીકદાવમ્ ।
શરચ્ચન્દ્રવક્ત્રં લસત્પદ્મનેત્રં
દુરાવારપારં ભજે રાઘવેશમ્ ॥ ૩૦॥

સુરાધીશનીલાભ્રનીલાઙ્ગકાન્તિં
વિરાધાદિરક્ષોવધાલ્લોકશાન્તિમ્ ।
કિરીટાદિશોભં પુરારાતિલાભં

ભજે રામચન્દ્રં રઘૂણામધીશમ્ ॥ ૩૧॥

લસચ્ચન્દ્રકોટિપ્રકાશાદિપીઠે
સમાસીનમઙ્કે સમાધાય સીતામ્ ।
સ્ફુરદ્ધેમવર્ણાં તડિત્પુઞ્જભાસાં
ભજે રામચન્દ્રં નિવૃત્તાર્તિતન્દ્રમ્ ॥ ૩૨॥

તતઃ પ્રોવાચ ભગવાન્ ભવાન્યા સહિતો ભવઃ ।
રામં કમલપત્રાક્ષં વિમાનસ્થો નભઃસ્થલે ॥ ૩૩॥

આગમિષ્યામ્યયોધ્યાયાં દ્રષ્ટું ત્વાં રાજ્યસત્કૃતમ્ ।
ઇદાનીં પશ્ય પિતરમસ્ય દેહસ્ય રાઘવ ॥ ૩૪॥

તતોઽપશ્યદ્વિમાનસ્થં રામો દશરથં પુરઃ ।
નનામ શિરસા પાદૌ મુદા ભક્ત્યા સહાનુજઃ ॥ ૩૫॥

આલિઙ્ગ્ય મૂર્ધ્ન્યવઘ્રાય રામં દશરથોઽબ્રવીત્ ।
તારિતોઽસ્મિ ત્વયા વત્સ સંસારાદ્દુઃખસાગરાત્ ॥ ૩૬॥

ઇત્યુક્ત્વા પુનરાલિઙ્ગ્ય યયૌ રામેણ પૂજિતઃ ।
રામોઽપિ દેવરાજં તં દૃષ્ટ્વા પ્રાહ કૃતાઞ્જલિમ્ ॥ ૩૭॥

મત્કૃતે નિહતાન્ સઙ્ખ્યે વાનરાન્ પતિતાન્ ભુવિ ।
જીવયાશુ સુધાવૃષ્ટ્યા સહસ્રાક્ષ મમાજ્ઞયા ॥ ૩૮॥

તથેત્યમૃતવૃષ્ટ્યા તાન્ જીવયામાસ વાનરાન્ ।
યે યે મૃતા મૃધે પૂર્વં તે તે સુપ્તોત્થિતા ઇવ ।
પૂર્વવદ્બલિનો હૃષ્ટા રામપાર્શ્વમુપાયયુઃ ॥ ૩૯॥

નોત્થિતા રાક્ષસાસ્તત્ર પીયૂષસ્પર્શનાદપિ ।
વિભીષણસ્તુ સાષ્ટાઙ્ગં પ્રણિપત્યાબ્રવીદ્વચઃ ॥ ૪૦॥

દેવ મામનુગૃહ્ણીષ્વ મયિ ભક્તિર્યદા તવ ।
મઙ્ગલસ્નાનમદ્ય ત્વં કુરુ સીતાસમન્વિતઃ ॥ ૪૧॥

અલઙ્કૃત્ય સહ ભ્રાત્રા શ્વો ગમિષ્યામહે વયમ્ ।
વિભીષણવચઃ શ્રુત્વા પ્રત્યુવાચ રઘૂત્તમઃ ॥ ૪૨॥

સુકુમારોઽતિભક્તો મે ભરતો મામવેક્ષતે ।
જટાવલ્કલધારી સ શબ્દબ્રહ્મસમાહિતઃ ॥ ૪૩॥

કથં તેન વિના સ્નાનમલઙ્કારાદિકં મમ ।
અતઃ સુગ્રીવમુખ્યાંસ્ત્વં પૂજયાશુ વિશેષતઃ ॥ ૪૪॥

પૂજિતેષુ કપીન્દ્રેષુ પૂજિતોઽહં ન સંશયઃ ।
ઇત્યુક્તો રાઘવેણાશુ સ્વર્ણરત્નામ્બરાણિ ચ ॥ ૪૫॥

વવર્ષ રાક્ષસશ્રેષ્ઠો યથાકામં યથારુચિ ।
તતસ્તાન્ પૂજિતાન્ દૃષ્ટ્વા રામો રત્નૈશ્ચ યૂથપાન્ ॥ ૪૬॥

અભિનન્દ્ય યથાન્યાયં વિસસર્જ હરીશ્વરાન્ ।
વિભીષણસમાનીતં પુષ્પકં સૂર્યવર્ચસમ્ ॥ ૪૭॥

આરુરોહ તતો રામસ્તદ્વિમાનમનુત્તમમ્ ।
અઙ્કે નિધાય વૈદેહીં લજ્જમાનાં યશસ્વિનીમ્ ॥ ૪૮॥

લક્ષ્મણેન સહ ભ્રાત્રા વિક્રાન્તેન ધનુષ્મતા ।
અબ્રવીચ્ચ વિમાનસ્થઃ શ્રીરામઃ  સર્વવાનરાન્ ॥ ૪૯॥

સુગ્રીવં હરિરાજં ચ અઙ્ગદં ચ વિભીષણમ્ ।
મિત્રકાર્યં કૃતં સર્વં ભવદ્ભિઃ સહ વાનરૈઃ ॥ ૫૦॥

અનુજ્ઞાતા મયા સર્વે યથેષ્ટં ગન્તુમર્હથ ।
સુગ્રીવ પ્રતિયાહ્યાશુ કિષ્કિન્ધાં સર્વસૈનિકૈઃ ॥ ૫૧॥

સ્વરાજ્યે વસ લઙ્કાયાં મમ ભક્તો વિભીષણ ।
ન ત્વાં ધર્ષયિતું શક્તાઃ સેન્દ્રા અપિ દિવૌકસઃ ॥ ૫૨॥

અયોધ્યાં ગન્તુમિચ્છામિ રાજધાનીં પિતુર્મમ ।
એવમુક્તાસ્તુ રામેણ વાનરાસ્તે મહાબલાઃ ॥ ૫૩॥

ઊચુઃ પ્રાઞ્જલયઃ સર્વે રાક્ષસશ્ચ વિભીષણઃ ।
અયોધ્યાં ગન્તુમિચ્છામસ્ત્વયા સહ રઘૂત્તમ ॥ ૫૪॥

દૃષ્ટ્વા ત્વામભિષિક્તં તુ કૌસલ્યામભિવાદ્ય ચ ।
પશ્ચાદ્વૃણીમહે રાજ્યમનુજ્ઞાં દેહિ નઃ પ્રભો ॥ ૫૫॥

રામસ્તથેતિ સુગ્રીવ વાનરૈઃ સવિભીષણઃ ।
પુષ્પકં સહનૂમાંશ્ચ શીઘ્રમારોહ સામ્પ્રતમ્ ॥ ૫૬॥

તતસ્તુ પુષ્પકં દિવ્યં સુગ્રીવઃ સહ સેનયા ।
વિભીષણશ્ચ સામાત્યઃ સર્વે ચારુરુહુર્દ્રુતમ્ ॥ ૫૭॥

તેષ્વારૂઢેષુ સર્વેષુ કૌબેરં પરમાસનમ્ ।
રાઘવેણાભ્યનુજ્ઞાતમુત્પપાત વિહાયસા ॥ ૫૮॥

બભૌ તેન વિમાનેન હંસયુક્તેન ભાસ્વતા ।
પ્રહૃષ્ટશ્ચ તદા રામશ્ચતુર્મુખ ઇવાપરઃ ॥ ૫૯॥

તતો બભૌ ભાસ્કરબિમ્બતુલ્યં
કુબેરયાનં તપસાનુલબ્ધમ્ ।
રામેણ શોભાં નિતરાં પ્રપેદે
સીતાસમેતેન સહાનુજેન ॥ ૬૦॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે યુદ્ધકાણ્ડે
ત્રયોદશઃ સર્ગઃ ॥ ૧૩॥

## ॥ ચતુર્દશઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
પાતયિત્વા તતશ્ચક્ષુઃ સર્વતો રઘુનન્દનઃ ।
અબ્રવીન્મૈથિલીં સીતાં રામઃ શશિનિભાનનામ્ ॥ ૧॥

ત્રિકૂટશિખરાગ્રસ્થાં પશ્ય લઙ્કાં મહાપ્રભામ્ ।
એતાં રણભુવં પશ્ય માંસકર્દમપઙ્કિલામ્ ॥ ૨॥

અસુરાણાં પ્લવઙ્ગાનામત્ર વૈશસનં મહત્ ।
અત્ર મે નિહતઃ શેતે રાવણો રાક્ષસેશ્વરઃ ॥ ૩॥

કુમ્ભકર્ણેન્દ્રજિન્મુખ્યાઃ સર્વે ચાત્ર નિપાતિતાઃ ।
એષ સેતુર્મયા બદ્ધઃ સાગરે સલિલાશયે ॥ ૪॥

એતચ્ચ દૃશ્યતે તીર્થં સાગરસ્ય મહાત્મનઃ ।
સેતુબન્ધમિતિ ખ્યાતં ત્રૈલોક્યેન ચ પૂજિતમ્ ॥ ૫॥

એતત્પવિત્રં પરમં દર્શનાત્પાતકાપહમ્ ।
અત્ર રામેશ્વરો દેવો મયા શમ્ભુઃ પ્રતિષ્ઠિતઃ ॥ ૬॥

અત્ર માં શરણં પ્રાપ્તો મન્ત્રિભિશ્ચ વિભીષણઃ ।

એષા સુગ્રીવનગરી કિષ્કિન્ધા ચિત્રકાનના ॥ ૭॥

તત્ર રામાજ્ઞયા તારાપ્રમુખા હરિયોષિતઃ ।
આનયામાસ સુગ્રીવઃ સીતાયાઃ પ્રિયકામ્યયા ॥ ૮॥

તાભિઃ સહોત્થિતં શીઘ્રં વિમાનં પ્રેક્ષ્ય રાઘવઃ ।
પ્રાહ ચાદ્રિમૃષ્યમૂકં પશ્ય વાલ્યત્ર મે હતઃ ॥ ૯॥

એષા પઞ્ચવટી નામ રાક્ષસા યત્ર મે હતાઃ ।
અગસ્ત્યસ્ય સુતીક્ષ્ણસ્ય પશ્યાશ્રમપદે શુભે ॥ ૧૦॥

એતે તે તાપસાઃ સર્વે દૃશ્યન્તે વરવર્ણિનિ ।
અસૌ શૈલવરો દેવિ ચિત્રકૂટઃ પ્રકાશતે ॥ ૧૧॥

અત્ર માં કૈકયીપુત્રઃ પ્રસાદયિતુમાગતઃ ।
ભરદ્વાજાશ્રમં પશ્ય દૃશ્યતે યમુનાતટે ॥ ૧૨॥

એષા ભાગીરથી ગઙ્ગા દૃશ્યતે લોકપાવની ।
એષા સા દૃશ્યતે સીતે સરયૂર્યૂપમાલિની ॥ ૧૩॥

એષા સા દૃશ્યતેઽયોધ્યા પ્રણામં કુરુ ભામિનિ ।
એવં ક્રમેણ સમ્પ્રાપ્તો ભરદ્વાજાશ્રમં હરિઃ ॥ ૧૪॥

પૂર્ણે ચતુર્દશે વર્ષે પઞ્ચમ્યાં રઘુનન્દનઃ ।
ભરદ્વાજં મુનિં દૃષ્ટ્વા વવન્દે સાનુજઃ પ્રભુઃ ॥ ૧૫॥

પપ્રચ્છ મુનિમાસીનં વિનયેન રઘૂત્તમઃ ।
શ ृણોષિ કચ્ચિદ્ભરતઃ કુશલ્યાસ્તે સહાનુજઃ ॥ ૧૬॥

સુભિક્ષા વર્તતેઽયોધ્યા જીવન્તિ ચ હિ માતરઃ ।
શ્રુત્વા રામસ્ય વચનં ભરદ્વાજઃ પ્રહૃષ્ટધીઃ ॥ ૧૭॥

પ્રાહ સર્વે કુશલિનો ભરતસ્તુ મહામનાઃ ।
ફલમૂલકૃતાહારો જટાવલ્કલધારકઃ ॥ ૧૮॥

પાદુકે સકલં ન્યસ્ય રાજ્યં ત્વાં સુપ્રતીક્ષતે ।
યદ્યત્કૃતં ત્વયા કર્મ દણ્ડકે રઘુનન્દન ॥ ૧૯॥

રાક્ષસાનાં વિનાશં ચ સીતાહરણપૂર્વકમ્ ।
સર્વં જ્ઞાતં મયા રામ તપસા તે પ્રસાદતઃ ॥ ૨૦॥

ત્વં બ્રહ્મ પરમં સાક્ષાદાદિમધ્યાન્તવર્જિતઃ ।
ત્વમગ્રે સલિલં સૃષ્ટ્વા તત્ર સુપ્તોઽસિ ભૂતકૃત્ ॥ ૨૧॥

નારાયણોઽસિ વિશ્વાત્મન્નરાણામન્તરાત્મકઃ ।
ત્વન્નાભિકમલોત્પન્નો બ્રહ્મા લોકપિતામહઃ ॥ ૨૨॥

અતસ્ત્વં જગતામીશઃ સર્વલોકનમસ્કૃતઃ ।
ત્વં વિષ્ણુર્જાનકી લક્ષ્મીઃ શેષોઽયં લક્ષ્મણાભિધઃ ॥ ૨૩॥

આત્મના સૃજસીદં ત્વમાત્મન્યેવાત્મમાયયા ।
ન સજ્જસે નભોવત્ત્વં ચિચ્છક્ત્યા સર્વસાક્ષિકઃ ॥ ૨૪॥

બહિરન્તશ્ચ ભૂતાનાં ત્વમેવ રઘુનન્દન ।
પૂર્ણોઽપિ મૂઢદૃષ્ટીનાં વિચ્છિન્ન ઇવ લક્ષ્યસે ॥ ૨૫॥

જગત્ત્વં જગદાધારસ્ત્વમેવ પરિપાલકઃ ।
ત્વમેવ સર્વભૂતાનાં ભોક્તા ભોજ્યં જગત્પતે ॥ ૨૬॥

દૃશ્યતે શ્રૂયતે યદ્યત્સ્મર્યતે વા રઘૂત્તમ ।
ત્વમેવ સર્વમખિલં ત્વદ્વિનાન્યન્ન કિઞ્ચન ॥ ૨૭॥

માયા સૃજતિ લોકાંશ્ચ સ્વગુણૈરહમાદિભિઃ ।
ત્વચ્છક્તિપ્રેરિતા રામ તસ્માત્ત્વય્યુપચર્યતે ॥ ૨૮॥

યથા ચુમ્બકસાન્નિધ્યાચ્ચલન્ત્યેવાયસાદયઃ ।
જડાસ્તથા ત્વયા દૃષ્ટા માયા સૃજતિ વૈ જગત્ ॥ ૨૯॥

દેહદ્વયમદેહસ્ય તવ વિશ્વં રિરક્ષિષોઃ ।
વિરાટ્ સ્થૂલં શરીરં તે સૂત્રં સૂક્ષ્મમુદાહૃતમ્ ॥ ૩૦॥

વિરાજઃ સમ્ભવન્ત્યેતે અવતારાઃ સહસ્રશઃ ।
કાર્યાન્તે પ્રવિશન્ત્યેવ વિરાજં રઘુનન્દન ॥ ૩૧॥

અવતારકથાં લોકે યે ગાયન્તિ ગૃણન્તિ ચ ।
અનન્યમનસો મુક્તિસ્તેષામેવ રઘૂત્તમ ॥ ૩૨॥

ત્વં બ્રહ્મણા પુરા ભૂમેર્ભારહારાય રાઘવ ।
પ્રાર્થિતસ્તપસા તુષ્ટસ્ત્વં જાતોઽસિ રઘોઃ કુલે ॥ ૩૩॥

દેવકાર્યમશેષેણ કૃતં તે રામ દુષ્કરમ્ ।
બહુવર્ષસહસ્રાણિ માનુષં દેહમાશ્રિતઃ ॥ ૩૪॥

કુર્વન્ દુષ્કરકર્માણિ લોકદ્વયહિતાય ચ ।
પાપહારીણિ ભુવનં યશસા પૂરયિષ્યસિ ॥ ૩૫॥

પ્રાર્થયામિ જગન્નાથ પવિત્રં કુરુ મે ગૃહમ્ ।
સ્થિત્વાદ્ય ભુક્ત્વા સબલઃ શ્વો ગમિષ્યસિ પત્તનમ્ ॥ ૩૬॥

તથેતિ રાઘવોઽતિષ્ઠત્તસ્મિન્નાશ્રમ ઉત્તમે ।
સસૈન્યઃ પૂજિતસ્તેન સીતયા લક્ષ્મણેન ચ ॥ ૩૭॥

તતો રામશ્ચિન્તયિત્વા મુહૂર્તં પ્રાહ મારુતિમ્ ।
ઇતો ગચ્છ હનૂમંસ્ત્વમયોધ્યાં પ્રતિ સત્વરઃ ॥ ૩૮॥

જાનીહિ કુશલી કચ્ચિજ્જનો નૃપતિમન્દિરે ।
શ‍ૃઙ્ગવેરપુરં ગત્વા બ્રૂહિ મિત્રં ગુહં મમ ॥ ૩૯॥

જાનકીલક્ષ્મણોપેતમાગતં માં નિવેદય ।
નન્દિગ્રામં તતો ગત્વા ભ્રાતરં ભરતં મમ ॥ ૪૦॥

દૃષ્ટ્વા બ્રૂહિ સભાર્યસ્ય સભ્રાતુઃ કુશલં મમ ।
સીતાપહરણાદીનિ રાવણસ્ય વધાદિકમ્ ॥ ૪૧॥

બ્રૂહિ ક્રમેણ મે ભ્રાતુઃ સર્વં તત્ર વિચેષ્ટિતમ્ ।
હત્વા શત્રુગણાન્ સર્વાન્ સભાર્યઃ સહલક્ષ્મણઃ ॥ ૪૨॥

ઉપયાતિ સમૃદ્ધાર્થઃ સહ ઋક્ષહરીશ્વરૈઃ ।
ઇત્યુક્ત્વા તત્ર વૃત્તાન્તં ભરતસ્ય વિચેષ્ટિતમ્ ॥ ૪૩॥

સર્વં જ્ઞાત્વા પુનઃ શીઘ્રમાગચ્છ મમ સન્નિધિમ્ ।
તથેતિ હનુમાંસ્તત્ર માનુષં વપુરાસ્થિતઃ ॥ ૪૪॥

નન્દિગ્રામં યયૌ તૂર્ણં વાયુવેગેન મારુતિઃ ।
ગરુત્માનિવ વેગેન જિઘૃક્ષન્ ભુજગોત્તમમ્ ॥ ૪૫॥

શ‍ૃઙ્ગવેરપુરં પ્રાપ્ય ગુહમાસાદ્ય મારુતિઃ ।
ઉવાચા મધુરં વાક્યં પ્રહૃષ્ટેનાન્તરાત્મના ॥ ૪૬॥

રામો દાશરથિઃ શ્રીમાન્ સખા તે સહ સીતયા ।
સલક્ષ્મણસ્ત્વાં ધર્માત્મા ક્ષેમી કુશલમબ્રવીત્ ॥ ૪૭॥

અનુજ્ઞાતોઽદ્ય મુનિના ભરદ્વાજેન રાઘવઃ ।

આગમિષ્યતિ તં દેવં દ્રક્ષ્યસિ ત્વં રઘૂત્તમમ્ ॥ ૪૮॥

એવમુક્ત્વા મહાતેજાઃ સમ્પ્રહૃષ્ટતનૂરુહમ્ ।
ઉત્પપાત મહાવેગો વાયુવેગેન મારુતિઃ ॥ ૪૯॥

સોઽપશ્યદ્રામતીર્થં ચ સરયૂં ચ મહાનદીમ્ ।
તામતિક્રમ્ય હનુમાન્નન્દિગ્રામં યયૌ મુદા ॥ ૫૦॥

ક્રોશમાત્રે ત્વયોધ્યાયાશ્ચીરકૃષ્ણાજિનામ્બરમ્ ।
દદર્શ ભરતં દીનં કૃશમાશ્રમવાસિનમ્ ॥ ૫૧॥

મલપઙ્કવિદિગ્ધાઙ્ગં જટિલં વલ્કલામ્બરમ્ ।
ફલમૂલકૃતાહારં રામચિન્તાપરાયણમ્ ॥ ૫૨॥

પાદુકે તે પુરસ્કૃત્ય શાસયન્તં વસુન્ધરામ્ ।
મન્ત્રિભિઃ પૌરમુખ્યૈશ્ચ કાષાયામ્બરધારિભિઃ ॥ ૫૩॥

વૃતદેહં મૂર્તિમન્તં સાક્ષાદ્ધર્મમિવ સ્થિતમ્ ।
ઉવાચ પ્રાઞ્જલિર્વાક્યં હનૂમાન્મારુતાત્મજઃ ॥ ૫૪॥

યં ત્વં ચિન્તયસે રામં તાપસં દણ્ડકે સ્થિતમ્ ।
અનુશોચસિ કાકુત્સ્થઃ સ ત્વાં કુશલમબ્રવીત્ ॥ ૫૫॥

પ્રિયમાખ્યામિ તે દેવ શોકં ત્યજ સુદારુણમ્ ।
અસ્મિન્મુહૂર્તે ભ્રાત્રા ત્વં રામેણ સહ સઙ્ગતઃ ॥ ૫૬॥

સમરે રાવણં હત્વા રામઃ સીતામવાપ્ય ચ ।
ઉપયાતિ સમૃદ્ધાર્થઃ સસીતઃ સહલક્ષ્મણઃ ॥ ૫૭॥

એવમુક્તો મહાતેજા ભરતો હર્ષમૂર્ચ્છિતઃ ।
પપાત ભુવિ ચાસ્વસ્થઃ કૈકયીપ્રિયનન્દનઃ ॥ ૫૮॥

આલિઙ્ગ્ય ભરતઃ શીઘ્રં મારુતિં પ્રિયવાદિનમ્ ।
આનન્દજૈરશ્રુજલૈઃ સિષેચ ભરતઃ કપિમ્ ॥ ૫૯॥

દેવો વા માનુષો વા ત્વમનુક્રોશાદિહાગતઃ ।
પ્રિયાખ્યાનસ્ય તે સૌમ્ય દદામિ બ્રુવતઃ પ્રિયમ્ ॥ ૬૦॥

ગવાં શતસહસ્રં ચ ગ્રામાણાં ચ શતં વરમ્ ।
સર્વાભરણસમ્પન્ના મુગ્ધાઃ કન્યાસ્તુ ષોડશ ॥ ૬૧॥

એવમુક્ત્વા પુનઃ પ્રાહ ભરતો મારુતાત્મજમ્ ।
બહૂનીમાનિ વર્ષાણિ ગતસ્ય સુમહદ્વનમ્ ॥ ૬૨॥

શ્ ૃણોમ્યહં પ્રીતિકરં મમ નાથસ્ય કીર્તનમ્ ।
કલ્યાણી બત ગાથેયં લૌકિકી પ્રતિભાતિ મે ॥ ૬૩॥

એતિ જીવન્તમાનન્દો નરં વર્ષશતાદપિ ।
રાઘવસ્ય હરીણાં ચ કથમાસીત્સમાગમઃ ॥ ૬૪॥

તત્ત્વમાખ્યાહિ ભદ્રં તે વિશ્વસેયં વચસ્તવ ।
એવમુક્તોઽથ હનુમાન્ ભરતેન મહાત્મના ॥ ૬૫॥

આચચક્ષેઽથ રામસ્ય ચરિતં કૃત્સ્નશઃ ક્રમાત્ ।
શ્રુત્વા તુ પરમાનન્દં ભરતો મારુતાત્મજાત્ ॥ ૬૬॥

આજ્ઞાપયચ્છત્રુહણં મુદા યુક્તં મુદાન્વિતઃ ।
દૈવતાનિ ચ યાવન્તિ નગરે રઘુનન્દન ॥ ૬૭॥

નાનોપહારબલિભિઃ પૂજયન્તુ મહાધિયઃ ।
સૂતા વૈતાલિકાશ્ચૈવ વન્દિનઃ સ્તુતિપાઠકાઃ ॥ ૬૮॥

વારમુખ્યાશ્ચ શતશો નિર્યાન્ત્વદ્યૈવ સઙ્ઘશઃ ।
રાજદારાસ્તથામાત્યાઃ સેના હસ્ત્યશ્વપત્તયઃ ॥ ૬૯॥

બ્રાહ્મણાશ્ચ તથા પૌરા રાજાનો યે સમાગતાઃ ।
નિર્યાન્તુ રાઘવસ્યાદ્ય દ્રષ્ટું શશિનિભાનનમ્ ॥ ૭૦॥

ભરતસ્ય વચઃ શ્રુત્વા શત્રુઘ્નપરિચોદિતાઃ ।
અલઞ્ચક્રુશ્ચ નગરીં મુક્તારત્નમયોજ્જ્વલૈઃ ॥ ૭૧॥

તોરણૈશ્ચ પતાકાભિર્વિચિત્રાભિરનેકધા ।
અલઙ્કુર્વન્તિ વેશ્માનિ નાનાબલિવિચક્ષણાઃ ॥ ૭૨॥

નિર્યાન્તિ વૃન્દશઃ સર્વે રામદર્શનલાલસાઃ ।
હયાનાં શતસાહસ્રં ગજાનામયુતં તથા ॥ ૭૩॥

રથાનાં દશસાહસ્રં સ્વર્ણસૂત્રવિભૂષિતમ્ ।
પારમેષ્ઠીન્યુપાદાય દ્રવ્યાણ્યુચ્ચાવચાનિ ચ ॥ ૭૪॥

તતસ્તુ શિબિકારૂઢા નિર્યયૂ રાજયોષિતઃ ।
ભરતઃ પાદુકે ન્યસ્ય શિરસ્યેવ કૃતાઞ્જલિઃ ॥ ૭૫॥

શત્રુઘ્નસહિતો રામં પાદચારેણ નિર્યયૌ ।
તદૈવ દૃશ્યતે દૂરાદ્વિમાનં ચન્દ્રસન્નિભમ્ ॥ ૭૬॥

પુષ્પકં સૂર્યસઙ્કાશં મનસા બ્રહ્મનિર્મિતમ્ ।
એતસ્મિન્ ભ્રાતરૌ વીરૌ વૈદેહ્યા રામલક્ષ્મણૌ ॥ ૭૭॥

સુગ્રીવશ્ચ કપિશ્રેષ્ઠો મન્ત્રિભિશ્ચ વિભીષણઃ ।
દૃશ્યતે પશ્યત જના ઇત્યાહ પવનાત્મજઃ ॥ ૭૮॥

તતો હર્ષસમુદ્ભૂતો નિઃસ્વનો દિવમસ્પૃશત્ ।
સ્ત્રીબાલયુવવૃદ્ધાનાં રામોઽયમિતિ કીર્તનાત્ ॥ ૭૯॥

રથકુઞ્જરવાજિસ્થા અવતીર્ય મહીં ગતાઃ ।
દદૃશુસ્તે વિમાનસ્થં જનાઃ સોમમિવામ્બરે ॥ ૮૦॥

પ્રાઞ્જલિર્ભરતો ભૂત્વા પ્રહૃષ્ટો રાઘવોન્મુખઃ ।
તતો વિમાનાગ્રગતં ભરતો રાઘવં મુદા ॥ ૮૧॥

વવન્દે પ્રણતો રામં મેરુસ્થમિવ ભાસ્કરમ્ ।
તતો રામાભ્યનુજ્ઞાતં વિમાનમપતદ્ભુવિ ॥ ૮૨॥

આરોપિતો વિમાનં તદ્ભરતઃ સાનુજસ્તદા ।
રામમાસાદ્ય મુદિતઃ પુનરેવાભ્યવાદયત્ ॥ ૮૩॥

સમુત્થાય ચિરાદ્દૃષ્ટં ભરતં રઘુનન્દનઃ ।
ભ્રાતરં સ્વાઙ્કમારોપ્ય મુદા તં પરિષસ્વજે ॥ ૮૪॥

તતો લક્ષ્મણમાસાદ્ય વૈદેહીં નામ કીર્તયન્ ।
અભ્યવાદયત પ્રીતો ભરતઃ પ્રેમવિહ્વલઃ ॥ ૮૫॥

સુગ્રીવં જામ્બવન્તં ચ યુવરાજં તથાઙ્ગદમ્ ।
મૈન્દદ્વિવિદનીલાંશ્ચ ઋષભં ચૈવ સસ્વજે ॥ ૮૬॥

સુષેણં ચ નલં ચૈવ ગવાક્ષં ગન્ધમાદનમ્ ।
શરભં પનસં ચૈવ ભરતઃ પરિષસ્વજે ॥ ૮૭॥

સર્વે તે માનુષં રૂપં કૃત્વા ભરતમાદૃતાઃ ।
પપ્રચ્છુઃ કુશલં સૌમ્યાઃ પ્રહૃષ્ટાશ્ચ પ્લવઙ્ગમાઃ ॥ ૮૮॥

તતઃ સુગ્રીવમાલિઙ્ગ્ય ભરતઃ પ્રાહ ભક્તિતઃ ।

ત્વત્સહાયેન રામસ્ય જયોઽભૂદ્રાવણો હતઃ ॥ ૮૯॥

ત્વમસ્માકં ચતુર્ણાં તુ ભ્રાતા સુગ્રીવ પઞ્ચમઃ ।
શત્રુઘ્નશ્ચ તદા રામમભિવાદ્ય સલક્ષ્મણમ્ ॥ ૯૦॥

સીતાયાશ્ચરણૌ પશ્ચાદ્વવન્દે વિનયાન્વિતઃ ।
રામો માતરમાસાદ્ય વિવર્ણાં શોકવિહ્વલામ્ ॥ ૯૧॥

જગ્રાહ પ્રણતઃ પાદૌ મનો માતુઃ પ્રસાદયન્ ।
કૈકેયીં ચ સુમિત્રાં ચ નનામેતરમાતરૌ ॥ ૯૨॥

ભરતઃ પાદુકે તે તુ રાઘવસ્ય સુપૂજિતે ।
યોજયામાસ રામસ્ય પાદયોર્ભક્તિસંયુતઃ ॥ ૯૩॥

રાજ્યમેતન્ન્યાસભૂતં મયા નિર્યાતિતં તવ ।
અદ્ય મે સફલં જન્મ ફલિતો મે મનોરથઃ ॥ ૯૪॥

યત્પશ્યામિ સમાયાતમયોધ્યાં ત્વામહં પ્રભો ।
કોષ્ઠાગારં બલં કોશં કૃતં દશગુણં મયા ॥ ૯૫॥

ત્વત્તેજસા જગન્નાથ પાલયસ્વ પુરં સ્વકમ્ ।
ઇતિ બ્રુવાણં ભરતં દૃષ્ટ્વા સર્વે કપીશ્વરાઃ ॥ ૯૬॥

મુમુચુર્નેત્રજં તોયં પ્રશશંસુર્મુદાન્વિતાઃ ।
તતો રામઃ પ્રહૃષ્ટાત્મા ભરતં સ્વાઙ્કગં મુદા ॥ ૯૭॥

યયૌ તેન વિમાનેન ભરતસ્યાશ્રમં તદા ।
અવરુહ્ય તદા રામો વિમાનાગ્ર્યાન્મહીતલમ્ ॥ ૯૮॥

અબ્રવીત્પુષ્પકં દેવો ગચ્છ વૈશ્રવણં વહ ।
અનુગચ્છાનુજાનામિ કુબેરં ધનપાલકમ્ ॥ ૯૯॥

રામો વસિષ્ઠસ્ય ગુરોઃ પદામ્બુજં
    નત્વા યથા દેવગુરોઃ શતક્રતુઃ ।
દત્ત્વા મહાર્હાસનમુત્તમં ગુરો-
    રુપાવિવેશાથ ગુરોઃ સમીપતઃ ॥ ૧૦૦॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે યુદ્ધકાણ્ડે
ચતુર્દશઃ સર્ગઃ ॥ ૧૪॥

## ॥ પઞ્ચદશઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
તતસ્તુ કૈકયીપુત્રો ભરતો ભક્તિસંયુતઃ ।
શિરસ્યઞ્જલિમાધાય જ્યેષ્ઠં ભ્રાતરમબ્રવીત્ ॥ ૧॥

માતા મે સત્કૃતા રામ દત્તં રાજ્યં ત્વયા મમ ।
દદામિ તત્તે ચ પુનર્યથા ત્વમદદા મમ ॥ ૨॥

ઇત્યુક્ત્વા પાદયોર્ભક્ત્યા સાષ્ટાઙ્ગં પ્રણિપત્ય ચ ।
બહુધા પ્રાર્થયામાસ કૈકેય્યા ગુરુણા સહ ॥ ૩॥

તથેતિ પ્રતિજગ્રાહ ભરતાદ્રાજ્યમીશ્વરઃ ।
માયામાશ્રિત્ય સકલાં નરચેષ્ટામુપાગતઃ ॥ ૪॥

સ્વારાજ્યાનુભવો યસ્ય સુખજ્ઞાનૈકરૂપિણઃ ।
નિરસ્તાતિશયાનન્દરૂપિણઃ પરમાત્મનઃ ॥ ૫॥

માનુષેણ તુ રાજ્યેન કિં તસ્ય જગદીશિતુઃ ।
યસ્ય ભ્રૂભઙ્ગમાત્રેણ ત્રિલોકી નશ્યતિ ક્ષણાત્ ॥ ૬॥

યસ્યાનુગ્રહમાત્રેણ ભવન્ત્યાખણ્ડલશ્રિયઃ ।
લીલાસૃષ્ટમહાસૃષ્ટેઃ કિયદેતદ્રમાપતેઃ ॥ ૭॥

તથાપિ ભજતાં નિત્યં કામપૂરવિધિત્સયા ।
લીલામાનુષદેહેન સર્વમપ્યનુવર્તતે ॥ ૮॥

તતઃ શત્રુઘ્નવચનાન્નિપુણઃ શ્મશ્રુકૃન્તકઃ
સમ્ભારાશ્ચાભિષેકાર્થમાનીતા રાઘવસ્ય હિ ॥ ૯॥

પૂર્વં તુ ભરતે સ્નાતે લક્ષ્મણે ચ મહાત્મનિ ।
સુગ્રીવે વાનરેન્દ્રે ચ રાક્ષસેન્દ્રે વિભીષણે ॥ ૧૦॥

વિશોધિતજટઃ સ્નાતશ્ચિત્રમાલ્યાનુલેપનઃ ।
મહાર્હવસનોપેતસ્તસ્થૌ તત્ર શ્રિયા જ્વલન્ ॥ ૧૧॥

પ્રતિકર્મ ચ રામસ્ય લક્ષ્મણશ્ચ મહામતિઃ ।
કારયામાસ ભરતઃ સીતાયા રાજયોષિતઃ ॥ ૧૨॥

મહાર્હવસ્ત્રાભરણૈરલઞ્ચક્રુઃ સુમધ્યમામ્ ।

તતો વાનરપત્નીનાં સર્વાસામેવ શોભના ॥ ૧૩॥

અકારયત કૌસલ્યા પ્રહૃષ્ટા પુત્રવત્સલા ।
તતઃ સ્યન્દનમાદાય શત્રુઘ્નવચનાત્સુધીઃ ॥ ૧૪॥

સુમન્ત્રઃ સૂર્યસઙ્કાશં યોજયિત્વાગ્રતઃ સ્થિતઃ ।
આરુરોહ રથં રામઃ સત્યધર્મપરાયણઃ ॥ ૧૫॥

સુગ્રીવો યુવરાજશ્ચ હનુમાંશ્ચ વિભીષણઃ ।
સ્નાત્વા દિવ્યામ્બરધરા દિવ્યાભરણભૂષિતાઃ ॥ ૧૬॥

રામમન્વીયુરગ્રે ચ રથાશ્વગજવાહનાઃ ।
સુગ્રીવપત્ન્યઃ સીતા ચ યયુર્યાનૈઃ પુરં મહત્ ॥ ૧૭॥

વજ્રપાણિર્યથા દેવૈર્હરિતાશ્વરથે સ્થિતઃ ।
પ્રયયૌ રથમાસ્થાય તથા રામો મહત્પુરમ્ ॥ ૧૮॥

સારથ્યં ભરતશ્ચક્રે રત્નદણ્ડં મહાદ્યુતિઃ ।
શ્વેતાતપત્રં શત્રુઘ્નો લક્ષ્મણો વ્યજનં દધે ॥ ૧૯॥

ચામરં ચ સમીપસ્થો ન્યવીજયદરિન્દમઃ ।
શશિપ્રકાશં ત્વપરં જગ્રાહાસુરનાયકઃ ॥ ૨૦॥

દિવિજૈઃ સિદ્ધસઙ્ઘૈશ્ચ ઋષિભિર્દિવ્યદર્શનૈઃ ।
સ્તૂયમાનસ્ય રામસ્ય શુશ્રુવે મધુરધ્વનિઃ ॥ ૨૧॥

માનુષં રૂપમાસ્થાય વાનરા ગજવાહનાઃ ।
ભેરીશઙ્ખનિનાદૈશ્ચ મૃદઙ્ગપણવાનકૈઃ ॥ ૨૨॥

પ્રયયૌ રાઘવશ્રેષ્ઠસ્તાં પુરીં સમલઙ્કૃતામ્ ।
દદૃશુસ્તે સમાયાન્તં રાઘવં પુરવાસિનઃ ॥ ૨૩॥

દૂર્વાદલશ્યામતનું મહાર્હ-
  કિરીટરત્નાભરણાઞ્ચિતાઙ્ગમ્ ।
આરક્તકઞ્જાયતલોચનાન્તં
  દૃષ્ટ્વા યયુર્મોદમતીવ પુણ્યાઃ ॥ ૨૪॥

વિચિત્રરત્નાઞ્ચિતસૂત્રનદ્ધ-
  પીતામ્બરં પીનભુજાન્તરાલમ્ ।
અનર્ઘ્યમુક્તાફલદિવ્યહારૈઃ

વિરોચમાનં રઘુનન્દનં પ્રજાઃ ॥ ૨૫॥

સુગ્રીવમુખ્યૈર્હરિભિઃ પ્રશાન્તૈઃ
નિષેવ્યમાણં રવિતુલ્યભાસમ્ ।
કસ્તૂરિકાચન્દનલિપ્તગાત્રં
નિવીતકલ્પદ્રુમપુષ્પમાલમ્ ॥ ૨૬॥

શ્રુત્વા સ્ત્રિયો રામમુપાગતં મુદા
પ્રહર્ષવેગોત્કલિતાનનશ્રિયઃ ।
અપાસ્ય સર્વં ગૃહકાર્યમાહિતં
હર્મ્યાણિ ચૈવારુરુહુઃ સ્વલઙ્કૃતાઃ ॥ ૨૭॥

દૃષ્ટ્વા હરિં સર્વદૃગુત્સવાકૃતિં
પુષ્પૈઃ કિરન્ત્યઃ સ્મિતશોભિતાનનાઃ ।
દૃગ્ભિઃ પુનર્નેત્રમનોરસાયનં
સ્વાનન્દમૂર્તિં મનસાભિરેભિરે ॥ ૨૮॥

રામઃ સ્મિતસ્નિગ્ધદૃશા પ્રજાસ્તથા
પશ્યન્ પ્રજાનાથ ઇવાપરઃ પ્રભુઃ ।
શનૈર્જગામાથ પિતુઃ સ્વલઙ્કૃતં
ગૃહં મહેન્દ્રાલયસન્નિભં હરિઃ ॥ ૨૯॥

પ્રવિશ્ય વેશ્માન્તરસંસ્થિતો મુદા
રામો વવન્દે ચરણૌ સ્વમાતુઃ ।
ક્રમેણ સર્વાઃ પિતૃયોષિતઃ પ્રભુઃ
નનામ ભક્ત્યા રઘુવંશકેતુઃ ॥ ૩૦॥

તતો ભરતમાહેદં રામઃ સત્યપરાક્રમઃ ।
સર્વસમ્પત્સમાયુક્તં મમ મન્દિરમુત્તમમ્ ॥ ૩૧॥

મિત્રાય વાનરેન્દ્રાય સુગ્રીવાય પ્રદીયતામ્ ।
સર્વેભ્યઃ સુખવાસાર્થં મન્દિરાણિ પ્રકલ્પય ॥ ૩૨॥

રામેણૈવં સમાદિષ્ટો ભરતશ્ચ તથાકરોત્ ।
ઉવાચ ચ મહાતેજાઃ સુગ્રીવં રાઘવાનુજઃ ॥ ૩૩॥

રાઘવસ્યાભિષેકાર્થં ચતુઃસિન્ધુજલં શુભમ્ ।
આનેતું પ્રેષયસ્વાશુ દૂતાંસ્ત્વરિતવિક્રમાન્ ॥ ૩૪॥

પ્રેષયામાસ સુગ્રીવો જામ્બવન્તં મરુત્સુતમ્ ।
અઙ્ગદં ચ સુષેણં ચ તે ગત્વા વાયુવેગતઃ ॥ ૩૫॥

જલપૂર્ણાન્ શાતકુમ્ભકલશાંશ્ચ સમાનયન્ ।
આનીતં તીર્થસલિલં શત્રુઘ્નો મન્ત્રિભિઃ સહ ॥ ૩૬॥

રાઘવસ્યાભિષેકાર્થં વસિષ્ઠાય ન્યવેદયત્ ।
તતસ્તુ પ્રયતો વૃદ્ધો વસિષ્ઠો બ્રાહ્મણૈઃ સહ ॥ ૩૭॥

રામં રત્નમયે પીઠે સસીતં સંન્યવેશયત્ ।
વસિષ્ઠો વામદેવશ્ચ જાબાલિર્ગૌતમસ્તથા ॥ ૩૮॥

વાલ્મીકિશ્ચ તથા ચક્રુઃ સર્વે રામાભિષેચનમ્ ।
કુશાગ્રતુલસીયુક્તપુણ્યગન્ધજલૈર્મુદા ॥ ૩૯॥

અભ્યષિઞ્ચન્ રઘુશ્રેષ્ઠં વાસવં વસવો યથા ।
ઋત્વિગ્ભિર્બ્રાહ્મણૈઃ શ્રેષ્ઠૈઃ કન્યાભિઃ સહ મન્ત્રિભિઃ ॥ ૪૦॥

સર્વૌષધિરસૈશ્ચૈવ દૈવતૈર્નભસિ સ્થિતૈઃ ।
ચતુર્ભિર્લોકપાલૈશ્ચ સ્તુવદ્ભિઃ સગણૈસ્તથા ॥ ૪૧॥

છત્રં ચ તસ્ય જગ્રાહ શત્રુઘ્નઃ પાણ્ડુરં શુભમ્ ।
સુગ્રીવરાક્ષસેન્દ્રૌ તૌ દધતુઃ શ્વેતચામરે ॥ ૪૨॥

માલાં ચ કાઞ્ચનીં વાયુર્દદૌ વાસવચોદિતઃ ।
સર્વરત્નસમાયુક્તં મણિકાઞ્ચનભૂષિતમ્ ॥ ૪૩॥

દદૌ હારં નરેન્દ્રાય સ્વયં શક્રસ્તુ ભક્તિતઃ ।
પ્રજગુર્દેવગન્ધર્વા નનૃતુશ્ચાપ્સરોગણાઃ ॥ ૪૪॥

દેવદુન્દુભયો નેદુઃ પુષ્પવૃષ્ટિઃ પપાત ખાત્ ।
નવદૂર્વાદલશ્યામં પદ્મપત્રાયતેક્ષણમ્ ॥ ૪૫॥

રવિકોટિપ્રભાયુક્તકિરીટેન વિરાજિતમ્ ।
કોટિકન્દર્પલાવણ્યં પીતામ્બરસમાવૃતમ્ ॥ ૪૬॥

દિવ્યાભરણસમ્પન્નં દિવ્યચન્દનલેપનમ્ ।
અયુતાદિત્યસઙ્કાશં દ્વિભુજં રઘુનન્દનમ્ ॥ ૪૭॥

વામભાગે સમાસીનાં સીતાં કાઞ્ચનસન્નિભામ્ ।
સર્વાભરણસમ્પન્નાં વામાઙ્કે સમુપસ્થિતામ્ ॥ ૪૮॥

રક્તોત્પલકરામ્ભોજાં વામેનાલિઙ્ગ્ય સંસ્થિતમ્ ।
સર્વાતિશયશોભાઢ્યં દૃષ્ટ્વા ભક્તિસમન્વિતઃ ॥ ૪૯॥

ઉમયા સહિતો દેવઃ શઙ્કરો રઘુનન્દનમ્ ।
સર્વદેવગણૈર્યુક્તઃ સ્તોતું સમુપચક્રમે ॥ ૫૦॥

શ્રીમહાદેવ ઉવાચ ।
નમોઽસ્તુ રામાય સશક્તિકાય
 નીલોત્પલશ્યામલકોમલાય ।
કિરીટહારાઙ્ગદભૂષણાય
 સિંહાસનસ્થાય મહાપ્રભાય ॥ ૫૧॥

ત્વમાદિમધ્યાન્તવિહીન એકઃ
 સૃજસ્યવસ્યત્સિ ચ લોકજાતમ્ ।
સ્વમાયયા તેન ન લિપ્યસે ત્વં
 યત્સ્વે સુખેઽજસ્રરતોઽનવદ્યઃ ॥ ૫૨॥

લીલાં વિધત્સે ગુણસંવૃતસ્ત્વં
 પ્રપન્નભક્તાનુવિધાનહેતોઃ ।
નાનાવતારૈઃ સુરમાનુષાદ્યૈઃ
 પ્રતીયસે જ્ઞાનિભિરેવ નિત્યમ્ ॥ ૫૩॥

સ્વાંશેન લોકં સકલં વિધાય તં
 બિભર્ષિ ચ ત્વં તદધઃ ફણીશ્વરઃ ।
ઉપર્યધો ભાન્વનિલોડુપૌષધિ-
 પ્રવર્ષરૂપોઽવસિ નૈકધા જગત્ ॥ ૫૪॥

ત્વમિહ દેહભૃતાં શિખિરૂપઃ
 પચસિ ભુક્તમશેષમજસ્રમ્ ।
પવનપઞ્ચકરૂપસહાયો
 જગદખણ્ડમનેન બિભર્ષિ ॥ ૫૫॥

ચન્દ્રસૂર્યશિખિમધ્યગતં યત્
 તેજ ઈશ ચિદશેષતનૂનામ્ ।
પ્રાભવત્તનુભૃતામિવ ધૈર્યં
 શૌર્યમાયુરખિલં તવ સત્ત્વમ્ ॥ ૫૬॥

ત્વં વિરિઞ્ચિશિવવિષ્ણુવિભેદાત્
 કાલકર્મશશિસૂર્યવિભાગાત્ ।
વાદિનાં પૃથગિવેશ વિભાસિ
 બ્રહ્મ નિશ્ચિતમનન્યદિહૈકમ્ ॥ ૫૭॥

મત્સ્યાદિરૂપેણ યથા ત્વમેકઃ
 શ્રુતૌ પુરાણેષુ ચ લોકસિદ્ધઃ ।
તથૈવ સર્વં સદસદ્વિભાગ-
 સ્ત્વમેવ નાન્યદ્ભવતો વિભાતિ ॥ ૫૮॥

યદ્યત્સમુત્પન્નમનન્તસૃષ્ટા-
 વુત્પત્સ્યતે યચ્ચ ભવચ્ચ યચ્ચ ।
ન દૃશ્યતે સ્થાવરજઙ્ગમાદૌ
 ત્વયા વિનાતઃપરતઃ પરસ્ત્વમ્ ॥ ૫૯॥

તત્ત્વં ન જાનન્તિ પરાત્મનસ્તે
 જનાઃ સમસ્તાસ્તવ માયયાતઃ ।
ત્વદ્ભક્તસેવાઽમલમાનસાનાં
 વિભાતિ તત્ત્વં પરમેકમૈશમ્ ॥ ૬૦॥

બ્રહ્માદયસ્તે ન વિદુઃ સ્વરૂપં
 ચિદાત્મતત્ત્વં બહિરર્થભાવાઃ ।
તતો બુધસ્ત્વામિદમેવ રૂપં
 ભક્ત્યા ભજન્મુક્તિમુપૈત્યદુઃખઃ ॥ ૬૧॥

અહં ભવન્નામ ગૃણન્ કૃતાર્થો
 વસામિ કાશ્યામનિશં ભવાન્યા ।
મુમૂર્ષમાણસ્ય વિમુક્તયેઽહં
 દિશામિ મન્ત્રં તવ રામ નામ ॥ ૬૨॥

ઇમં સ્તવં નિત્યમનન્યભક્ત્યા
 શ‍ૃણ્વન્તિ ગાયન્તિ લિખન્તિ યે વૈ ।
તે સર્વસૌખ્યં પરમં ચ લબ્ધ્વા
 ભવત્પદં યાન્તુ ભવત્પ્રસાદાત્ ॥ ૬૩॥

ઇન્દ્ર ઉવાચ ।

રક્ષોઽધિપેનાખિલદેવ સૌખ્યં
 હૃતં ચ મે બ્રહ્મવરેણ દેવ ।
પુનશ્ચ સર્વં ભવતઃ પ્રસાદાત્
 પ્રાપ્તં હતો રાક્ષસદુષ્ટશત્રુઃ ॥ ૬૪॥

દેવા ઊચુઃ
હૃતા યજ્ઞભાગા ધરાદેવદત્તા
 મુરારે ખલેનાદિદૈત્યેન વિષ્ણો ।
હતોઽદ્ય ત્વયા નો વિતાનેષુ ભાગાઃ
 પુરાવદ્ભવિષ્યન્તિ યુષ્મત્પ્રસાદાત્ ॥ ૬૫॥

પિતર ઊચુઃ
હતોઽદ્ય ત્વયા દુષ્ટદૈત્યો મહાત્મન્
 ગયાદૌ નરૈર્દત્તપિણ્ડાદિકાન્નઃ ।
બલાદત્તિ હત્વા ગૃહીત્વા સમસ્તા-
 નિદાનીં પુનર્લબ્ધસત્ત્વા ભવામઃ ॥ ૬૬॥

યક્ષા ઊચુઃ
સદા વિષ્ટિકર્મણ્યનેનાભિયુક્તા
 વહામો દશાસ્યં બલાદ્દુઃખયુક્તાઃ ।
દુરાત્મા હતો રાવણો રાઘવેશ
 ત્વયા તે વયં દુઃખજાતાદ્વિમુક્તાઃ ॥ ૬૭॥

ગન્ધર્વા ઊચુઃ
વયં સઙ્ગીતનિપુણા ગાયન્તસ્તે કથામૃતમ્ ।
આનન્દામૃતસન્દોહયુક્તાઃ પૂર્ણાઃ સ્થિતાઃ પુરા ॥ ૬૮॥

પશ્ચાદ્દુરાત્મના રામ રાવણેનાભિવિદ્રુતાઃ ।
તમેવ ગાયમાનાશ્ચ તદારાધનતત્પરાઃ ॥ ૬૯॥

સ્થિતાસ્ત્વયા પરિત્રાતા હતોઽયં દુષ્ટરાક્ષસઃ ।
એવં મહોરગાઃ સિદ્ધાઃ કિન્નરા મરુતસ્તથા ॥ ૭૦॥

વસવો મુનયો ગાવો ગુહ્યકાશ્ચ પતત્રિણઃ ।
સપ્રજાપતયશ્ચૈતે તથા ચાપ્સરસાં ગણાઃ ॥ ૭૧॥

સર્વે રામં સમાસાદ્ય દૃષ્ટ્વા નેત્રમહોત્સવમ્ ।

સ્તુત્વા પૃથક્ પૃથક્ સર્વે રાઘવેણાભિવન્દિતાઃ ॥ ૭૨॥

યયુઃ સ્વં સ્વં પદં સર્વે બ્રહ્મરુદ્રાદયસ્તથા ।
પ્રશંસન્તો મુદા રામં ગાયન્તસ્તસ્ય ચેષ્ટિતમ્ ॥ ૭૩॥

ધ્યાયન્તસ્ત્વભિષેકાર્દ્રં સીતાલક્ષ્મણસંયુતમ્ ।
સિંહાસનસ્થં રાજેન્દ્રં યયુઃ સર્વે હૃદિ સ્થિતમ્ ॥ ૭૪॥

ખે વાદ્યેષુ ધ્વનત્સુ પ્રમુદિતહૃદયૈર્દેવવૃન્દૈઃ સ્તુવદ્ભિઃ
વર્ષદ્ભિઃપુષ્પવૃષ્ટિં દિવિ મુનિનિકરૈરીડ્યમાનઃ સમન્તાત્ ।
રામઃ શ્યામઃ પ્રસન્નસ્મિતરુચિરમુખઃ સૂર્યકોટિપ્રકાશઃ
સીતાસૌમિત્રિવાતાત્મજમુનિહરિભિઃ સેવ્યમાનો વિભાતિ ॥ ૭૫॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે યુદ્ધકાણ્ડે
પઞ્ચદશઃ સર્ગઃ ॥ ૧૫॥

## ॥ ષોડશઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
રામેઽભિષિક્તે રાજેન્દ્રે સર્વલોકસુખાવહે ।
વસુધા સસ્યસમ્પન્ના ફલવન્તો મહીરુહાઃ ॥ ૧॥

ગન્ધહીનાનિ પુષ્પાણિ ગન્ધવન્તિ ચકાશિરે ।
સહસ્રશતમશ્વાનાં ધેનૂનાં ચ ગવાં તથા ॥ ૨॥

દદૌ શતવૃષાન્ પૂર્વં દ્વિજેભ્યો રઘુનન્દનઃ ।
ત્રિંશત્કોટિં સુવર્ણસ્ય બ્રાહ્મણેભ્યો દદૌ પુનઃ ॥ ૩॥

વસ્ત્રાભરણરત્નાનિ બ્રાહ્મણેભ્યો મુદા તથા ।
સૂર્યકાન્તિસમપ્રખ્યાં સર્વરત્નમયીં સ્રજમ્ ॥ ૪॥

સુગ્રીવાય દદૌ પ્રીત્યા રાઘવો ભક્તવત્સલઃ ।
અઙ્ગદાય દદૌ દિવ્યે હ્યઙ્ગદે રઘુનન્દનઃ ॥ ૫॥

ચન્દ્રકોટિપ્રતીકાશં મણિરત્નવિભૂષિતમ્ ।
સીતાયૈ પ્રદદૌ હારં પ્રીત્યા રઘુકુલોત્તમઃ ॥ ૬॥

અવમુચ્યાત્મનઃ કણ્ઠાદ્ધારં જનકનન્દિની ।

અવૈક્ષત હરીન્ સર્વાન્ ભર્તારં ચ મુહુર્મુહુઃ ॥ ૭॥

રામસ્તામાહ વૈદેહીમિઙ્ગિતજ્ઞો વિલોકયન્ ।
વૈદેહિ યસ્ય તુષ્ટાસિ દેહિ તસ્મૈ વરાનને ॥ ૮॥

હનૂમતે દદૌ હારં પશ્યતો રાઘવસ્ય ચ ।
તેન હારેણ શુશુભે મારુતિર્ગૌરવેણ ચ ॥ ૯॥

રામોઽપિ મારુતિં દૃષ્ટ્વા કૃતાઞ્જલિમુપસ્થિતમ્ ।
ભક્ત્યા પરમયા તુષ્ટ ઇદં વચનમબ્રવીત્ ॥ ૧૦॥

હનૂમંસ્તે પ્રસન્નોઽસ્મિ વરં વરય કાઙ્ક્ષિતમ્ ।
દાસ્યામિ દેવૈરપિ યદ્દુર્લભં ભુવનત્રયે ॥ ૧૧॥

હનૂમાનપિ તં પ્રાહ નત્વા રામં પ્રહૃષ્ટધીઃ ।
ત્વન્નામ સ્મરતો રામ ન તૃપ્યતિ મનો મમ ॥ ૧૨॥

અતસ્ત્વન્નામ સતતં સ્મરન્ સ્થાસ્યામિ ભૂતલે ।
યાવત્સ્થાસ્યતિ તે નામ લોકે તાવત્કલેવરમ્ ॥ ૧૩॥

મમ તિષ્ઠતુ રાજેન્દ્ર વરોઽયં મેઽભિકાઙ્ક્ષિતઃ ।
રામસ્તથેતિ તં પ્રાહ મુક્તસ્તિષ્ઠ યથાસુખમ્ ॥ ૧૪॥

કલ્પાન્તે મમ સાયૂજ્યં પ્રાપ્સ્યસે નાત્ર સંશયઃ ।
તમાહ જાનકી પ્રીતા યત્ર કુત્રાપિ મારુતે ॥ ૧૫॥

સ્થિતં ત્વામનુયાસ્યન્તિ ભોગાઃ સર્વે મમાજ્ઞયા ।
ઇત્યુક્તો મારુતિસ્તાભ્યામીશ્વરાભ્યાં પ્રહૃષ્ટધીઃ ॥ ૧૬॥

આનન્દાશ્રુપરીતાક્ષો ભૂયો ભૂયઃ પ્રણમ્ય તૌ ।
કૃચ્છ્રાદ્યયૌ તપસ્તપ્તું હિમવન્તં મહામતિઃ ॥ ૧૭॥

તતો ગુહં સમાસાદ્ય રામઃ પ્રાઞ્જલિમબ્રવીત્ ।
સખે ગચ્છ પુરં રમ્યં શ‍ૃઙ્ગવેરમનુત્તમમ્ ॥ ૧૮॥

મામેવ ચિન્તયન્નિત્યં ભુઙ્ક્ષ્વ ભોગાન્નિજાર્જિતાન્ ।
અન્તે મમૈવ સારૂપ્યં પ્રાપ્સ્યસે ત્વં ન સંશયઃ ॥ ૧૯॥

ઇત્યુક્ત્વા પ્રદદૌ તસ્મૈ દિવ્યાન્યાભરણાનિ ચ ।
રાજ્યં ચ વિપુલં દત્ત્વા વિજ્ઞાનં ચ દદૌ વિભુઃ ॥ ૨૦॥

રામેણાલિઙ્ગિતો હૃષ્ટો યયૌ સ્વભવનં ગુહઃ ।
યે ચાન્યે વાનરાઃ શ્રેષ્ઠા અયોધ્યાં સમુપાગતાઃ ॥ ૨૧॥

અમૂલ્યાભરણૈર્વસ્ત્રૈઃ પૂજયામાસ રાઘવઃ ।
સુગ્રીવપ્રમુખાઃ સર્વે વાનરાઃ સવિભીષણાઃ ॥ ૨૨॥

યથાર્હં પૂજિતાસ્તેન રામેણ પરમાત્મના ।
પ્રહૃષ્ટમનસઃ સર્વે જગ્મુરેવ યથાગતમ્ ॥ ૨૩॥

સુગ્રીવપ્રમુખાઃ સર્વે કિષ્કિન્ધાં પ્રયયુર્મુદા ।
વિભીષણસ્તુ સમ્પ્રાપ્ય રાજ્યં નિહતકણ્ટકમ્ ॥ ૨૪॥

રામેણઃ પૂજિતઃ પ્રીત્યા યયૌ લઙ્કામનિન્દિતઃ ।
રાઘવો રાજ્યમખિલં શશાસાખિલવત્સલઃ ॥ ૨૫॥

અનિચ્છન્નપિ રામેણ યૌવરાજ્યેઽભિષેચિતઃ ।
લક્ષ્મણઃ પરયા ભક્ત્યા રામસેવાપરોઽભવત્ ॥ ૨૬॥

રામસ્તુ પરમાત્માપિ કર્માધ્યક્ષોઽપિ નિર્મલઃ ।
કર્તૃત્વાદિ વિહીનોઽપિ નિર્વિકારોઽપિ સર્વદા ॥ ૨૭॥

સ્વાનન્દેનાપિ તુષ્ટઃ સન્ લોકાનામુપદેશકૃત્ ।
અશ્વમેધાદિયજ્ઞૈશ્ચ સર્વૈર્વિપુલદક્ષિણૈઃ ॥ ૨૮॥

અયજત્પરમાનન્દો માનુષં વપુરાશ્રિતઃ ।
ન પર્યદેવન્ વિધવા ન ચ વ્યાલકૃતં ભયમ્ ॥ ૨૯॥

ન વ્યાધિજં ભયં ચાસીદ્રામે રાજ્યં પ્રશાસતિ ।
લોકે દસ્યુભયં નાસીદનર્થો નાસ્તિ કશ્ચન ॥ ૩૦॥

વૃદ્ધેષુ સત્સુ બાલાનાં નાસીન્મૃત્યુભયં તથા ।
રામપૂજાપરાઃ સર્વે સર્વે રાઘવચિન્તકાઃ ॥ ૩૧॥

વવર્ષુર્જલદાસ્તોયં યથાકાલં યથારુચિ ।
પ્રજાઃ સ્વધર્મનિરતા વર્ણાશ્રમગુણાન્વિતાઃ ॥ ૩૨॥

ઔરસાનિવ રામોઽપિ જુગોપ પિતૃવત્પ્રજાઃ ।
સર્વલક્ષણસંયુક્તઃ સર્વધર્મપરાયણઃ ॥ ૩૩॥

દશવર્ષસહસ્રાણિ રામો રાજ્યમુપાસ્ત સઃ ॥ ૩૪॥

ઇદં રહસ્યં ધનધાન્યઋદ્ધિમ-
	દ્દીર્ઘાયુરારોગ્યકરં સુપુણ્યદમ્ ।
પવિત્રમાધ્યાત્મિકસઞ્જ્ઞિતં પુરા
	રામાયણં ભાષિતમાદિશમ્ભુના ॥ ૩૫॥

શ‍ૃણોતિ ભક્ત્યા મનુજઃ સમાહિતો
	ભક્ત્યા પઠેદ્વા પરિતુષ્ટમાનસઃ ।
સર્વાઃ સમાપ્નોતિ મનોગતાશિષો
	વિમુચ્યતે પાતકકોટિભિઃ ક્ષણાત્ ॥ ૩૬॥

રામાભિષેકં પ્રયતઃ શ‍ૃણોતિ યો
	ધનાભિલાષી લભતે મહદ્ધનમ્ ।
પુત્રાભિલાષી સુતમાર્યસમ્મતં
	પ્રાપ્નોતિ રામાયણમાદિતઃ પઠન્ ॥ ૩૭॥

શ‍ૃણોતિ યોઽધ્યાત્મિકરામસંહિતાં
	પ્રાપ્નોતિ રાજા ભુવમૃદ્ધસમ્પદમ્ ।
શત્રૂન્ વિજિત્યારિભિરપ્રધર્ષિતો
	વ્યપેતદુઃખો વિજયી ભવેન્નૃપઃ ॥ ૩૮॥

સ્ત્રિયોઽપિ શ‍ૃણ્વન્ત્યધિરામસંહિતાં
	ભવન્તિ તા જીવિસુતાશ્ચ પૂજિતાઃ ।
વન્ધ્યાપિ પુત્રં લભતે સુરૂપિણં
	કથામિમાં ભક્તિયુતા શ‍ૃણોતિ યા ॥ ૩૯॥

શ્રદ્ધાન્વિતો યઃ શ‍ૃણુયાત્પઠેન્નરો
	વિજિત્ય કોપં ચ તથા વિમત્સરઃ ।
દુર્ગાણિ સર્વાણિ વિજિત્ય નિર્ભયો
	ભવેત્સુખી રાઘવભક્તિસંયુતઃ ॥ ૪૦॥

સુરાઃ સમસ્તા અપિ યાન્તિ તુષ્ટતાં
	વિઘ્નાઃ સમસ્તા અપયાન્તિ શ‍ૃણ્વતામ્ ।
અધ્યાત્મરામાયણમાદિતો નૃણાં
	ભવન્તિ સર્વા અપિ સમ્પદઃ પરાઃ ॥ ૪૧॥

રજસ્વલા વા યદિ રામતત્પરા
	શ‍ૃણોતિ રામાયણમેતદાદિતઃ ।

પુત્રં પ્રસૂતે ઋષભં ચિરાયુષં
      પતિવ્રતા લોકસુપૂજિતા ભવેત્ ॥ ૪૨॥

પૂજયિત્વા તુ યે ભક્ત્યા નમસ્કુર્વન્તિ નિત્યશઃ ।
સર્વૈઃ પાપૈર્વિનિર્મુક્તા વિષ્ણોર્યાન્તિ પરં પદમ્ ॥ ૪૩॥

અધ્યાત્મરામચરિતં કૃત્સ્નં શ‍ૃણ્વન્તિ ભક્તિતઃ ।
પઠન્તિ વા સ્વયં વક્ત્રાત્તેષાં રામઃ પ્રસીદતિ ॥ ૪૪॥

રામ એવ પરં બ્રહ્મ તસ્મિંસ્તુષ્ટેઽખિલાત્મનિ ।
ધર્માર્થકામમોક્ષાણાં યદ્યદિચ્છતિ તદ્ભવેત્ ॥ ૪૫॥

શ્રોતવ્યં નિયમેનૈતદ્રામાયણમખણ્ડિતમ્ ।
આયુષ્યમારોગ્યકરં કલ્પકોટ્યઘનાશનમ્ ॥ ૪૬॥

દેવાશ્ચ સર્વે તુષ્યન્તિ ગ્રહાઃ સર્વે મહર્ષયઃ ।
રામાયણસ્ય શ્રવણે તૃપ્યન્તિ પિતરસ્તથા ॥ ૪૭॥

અધ્યાત્મરામાયણમેતદદ્ભુતં
      વૈરાગ્યવિજ્ઞાનયુતં પુરાતનમ્ ।
પઠન્તિ શ‍ૃણ્વન્તિ લિખન્તિ યે નરાઃ
      તેષાં ભવેઽસ્મિન્ન પુનર્ભવો ભવેત્ ॥ ૪૮॥

આલોડ્યાખિલવેદરાશિમસકૃદ્યત્તારકં બ્રહ્મ તદ્-
રામો વિષ્ણુરહસ્યમૂર્તિરિતિ યો વિજ્ઞાય ભૂતેશ્વરઃ ।
ઉદ્ધૃત્યાખિલસારસઙ્ગ્રહમિદં સઙ્ક્ષેપતઃ પ્રસ્ફુટં
શ્રીરામસ્ય નિગૂઢતત્ત્વમખિલં પ્રાહ પ્રિયાયૈ ભવઃ ॥ ૪૯॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે યુદ્ધકાણ્ડે ષોડશઃ
સર્ગઃ ॥ ૧૬॥

॥ સમાપ્તમિદં યુદ્ધકાણ્ડમ્ ॥

Encoded and proofread by
Vishwas Bhide vishwas underscore bhide at yahoo.com
Revised by Agne Easwaran easwaranpsa at rediffmail.com and
ahimsasoldier at gmail.com

*adhyAtmarAmAyaNe yuddhakANDam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*